# त्रिवेणिका

सम्पादकः—

**कालिकाप्रसाद शुक्लः**

Bharatiya Sahitya Granthamala's Chaturtha Pushpam

# THE TRIVEṆIKĀ

of

## ĀŚĀDHARA BHAṬṬA

*Edited with introduction*

*by*

**Kalika Prasad Shukla,** Vyakaranacharya,
Vyakaranadhyapak, Sanskrit Maha-
Vidyalaya–M. S. University
Baroda.

AND

*Expalanatory Note*

*by*

**Pt. Shri Krishnamani Tripathi,** Acharya,
M. A., SAHITYARATNA, Pradhanadhyapak
Shri Harihar Sanskrit Pathashala,
Varanasi.

*Published by*

**BHARATIYA SAHITYA VIDYALAYA**

VARANASI

*Critical Edition ]* *1957* *[ Price Rs. 2/-*

All Rights reserved by the Publisher.

भारतीय-साहित्य-ग्रन्थमालायाश्चतुर्थं पुष्पम्

श्रीमदाशाधरभट्टविरचिता

# त्रिवेणिका

वटपत्तनस्थ महाराज सयाजीराव विश्वविद्यालयीय-
संस्कृतमहाविद्यालय व्याकरणाध्यापकेन
व्याकरणाचार्येण, काव्यतीर्थेन
कालिकाप्रसाद शुक्लेन
भूमिकां संयोज्य
संशोधिता

वाराणसेय श्रीहरिहरसंस्कृतपाठशालायाः प्रधानाध्यापकेन
व्याकरण-साहित्य-साङ्ख्ययोग पुराणेतिहासाचार्येण,
एम्० ए०, साहित्यरत्न पदवीभाजा
पं० श्रीकृष्णमणि त्रिपाठिना
कृतया टिप्पण्या
च भूषिता

—:०:—

प्रकाशकः—

भारतीय-साहित्य-विद्यालय, वाराणसी।

गवेषणात्मकं संस्करणम्

वि० सं० २०१३
सन् १९५७

मूल्यम् २)

प्रकाशक—
भारतीय - साहित्य - विद्यालय,
१४।२६ टेढ़ीनीम,
वाराणसी।

सर्वाधिकारः प्रकाशकाधीनो वर्तते

मुद्रक—
सूरज प्रसाद गुप्त,
ज्वाला प्रिंटिंग वर्क्स, वाराणसी।

# समर्पणम्

श्रुतिस्मृतिपुराणादिप्रतिपादितमर्यादापरिपालकानां प्राच्यप्रतीच्यविद्याविशारदानां
सततं सुरभारतीसमुन्नयनसंलग्नचेतसां बुधजनजेगीयमानयशोराशीनाम्,
सहृदयहृदयानां विश्वविख्यातवाराणसेयराजकीयसंस्कृत-
महाविद्यालयप्रधानचार्यपरमलङ्कुर्वाणानां श्रीमतां
**पं. कुबेरनाथशुक्ल एम.ए. व्याकरणाचार्य-**
महोदयानां करकमलयोः सादरमियं
त्रिवेणिका समर्प्यते ।

**श्रीमत्काशिकराजकीयसुरवाग्विद्यालयाधीश्वर !**
**सन्मार्गाचरणैकतानमनसा श्रेष्ठप्रतिष्ठान्वित !**
**शश्वच्छास्त्रविचरणातिनिपुणे शुक्लान्वये सम्भव !**
**एतं श्रीलकुबेरनाथभगवन् ! ग्रन्थं मुदा स्वीकुरु ।**

समर्पकौ—

श्रीकृष्णमणित्रिपाठी कालिकाप्रसाद शुक्लश्च

## FORWARD

It affords me very great pleasure to write a brief forward to this small manual of Trivenika on Alankarshastra by Asadhara Bhatta, a versatile author and poet of the 18th century, critically edited by my colleague Vyakaranacharya Pandit Shri Kalika Prasad Shukla, Uttamakaksha Vyakaranadhyapaka of the Baroda Sanskrit Mahavidyalaya, Baroda with a learned and exhaustive Sanskrit introduction to it.

Trivenika, as its very name suggests, compares aptly the three powers of words, viz. the expressed sense ( अभिधा ), the indicated sense ( लक्षणा ) and the suggested sense ( व्यञ्जना ) in Kavya with the three currents of the Ganges, the Yamuna and the sarasvati respectively running into each other at Prayaga and elucidates in a brief, lucid and systematic manner the nature and the scope of these three powers of words with copious illustrations from the well known Mahakavyas and other works.

In fact, it is, as the author rightly puts it, a critical exposition of the functions or powers of words ( वृत्तिविवेचना ) based on कोविदानन्द a standard work of our author dealing with the detailed study of the powers of words in a verse form and as such it is a manual intended to simplify the subject in hand which is very important to the Vaiyakaranas, the Naiyayikas, the Mimansakas and the Alankarikas and to bring it within the comprehension of the beginners leaving nothing to be desired on it.

Besides Trivenika, the following works are known to have been composed by Asadhara Bhatta: 1. Kovidananda with its commentary called Kadambini, 2. Alankaradipika, a commentary on Kuvalayananda Karika of Appayya Dixit, 3. Advaitaviveka and 4. Prabhapatala. Of these, the first and the second are on the Alankarashastra and the third and the fourth are on Advaita Vedanta and Tantrashastra respectively. Kovidananda with its commentary is still in Ms. and the last two works are not still noticed.

To judge from his works, Pandit Mahopadhyaya, as the colophon mentions, seems to have been a versatile genius and scholar who approached the subject with a thorough knowledge of those branches of Sanskrit learning that have a direct bearing on the subject under treatment. His originality and free thinking are visible throughout Trivenika when he points out, now and then, his views on the subject under discussion and refutes the views of the opponents, viz. the Naiyayikas and the Vaiyakaranas regarding the acceptance of व्यञ्जना as शब्द व्यापार।

Asadhara Bhatta, as tradition says, belonged to Petlad or Pij of the Baroda district in South Gujarat. Very scanty details are available regarding the personal history of this eminent savant of Gujarat as he shares the fate of many Sanskrit writers of being known only in his works. The large number of quotations and references given by him in his works testifies to his being a poet of remarkable

scholarship and wide reading. The fact that the copies of the Mss. of his works are available in plenty in Bhandaras of Gujarat, Saurashtra and Kutch goes to prove that his works were very popular with the learned public during the last two centuries.

It is easy to fix approximately the date of our author. The reference to Vaiyakaranabhushansara of Kaunda Bhatta who belonged to the Second half of the 17th century and no reference to Nagesha Bhatta who flourished between 1674 A.D. and 1754 A. D. and who admits व्यञ्जना as शब्द व्यापार although himself an eminent grammarian lead one to believe that our author, as the learned editor holds, might be either contemporary of Nagesha Bhatta or his immediate successor. A copy of one of the Mss. consulted by the learned editor mentions that Asadhara wrote this work in Samvat 1830. Our author, therefore, may have lived between 1725 A. D. and 1800 A. D.

Contribution of Gujarat to enrich Sanskrit literature is of no mean order. Valabhipur, Srimal and Anahilwad Patan, chiefly represented through successive periods in the history of Gujarat by Bhatti Magha and Hemchandra respectively, are well known as centres of Brahmanical and Jain learning and offer an ample evidence to show that Gujarat has not lagged behind the othet parts of India in continuing the flame of the torch of Sanskrit learning burning in a variety of ways.

In view of his known and unknown works, Asadhar can very well be said to be one of those later

writers of Gujarat who have carried on the tradition of keeping alive the study and the promotion of Sanskrit literature in their humble way.

The popularity of the present work can best be measured by the fact that, although it has been first edited and published jointly by Batukanath Sarma Sahityopadhyaya, M. A. and Jagannatha Shastri Hoshing Sahityopadhyaya of Banaras some years ago, it is again taken up by the learned editor for its critical edition having an advantage over the former editors in having an opportunity to consult five Mss. available for the purpose in the very land of the author.

Concluding, the editor has spared no pains in preparing this present work by giving a masterly and exhaustive introduction containing all possible information regarding analysis of topics, the life, date and works of the author and the views of the different schools of thought concernd on the subject under treatment and critically edited text with explanatory notes where necessary and has thus enhanced the value of this small manual.

It is hoped that the editor will continue his love for research with sustained interest by bringing out a critical edition of Kovidananda which still is in Ms.

**Hari Prasad C. Mehta**
Principal
Baroda Sanskrit Mahavidyalaya
Bank Road, Barodâ
( The M. S. University of Baroda ).

Baroda.

4-9-1957

श्रीसरस्वत्यै नमः ।

# भूमिका

आत्मजनिजनितगुर्जरगवीगौरवस्याप्रतिमप्रतिभस्य पदवाक्यप्रमाणपारावारीणस्य श्रीमदाशाधरभट्टमहाभागस्य सारस्वतसुधापूरपूरितनिखिलावयवां मनीषिमानसमयूरकदम्बकादम्बिनीं कोविदकुलकैरवकौमुदीं पण्डितम्मन्यमनीषानिष्कनिकषोपलामलङ्कारशास्त्रतोयनिधितलावगाहनकामनाकलितमतीनां मलदलदलनपटीयसीं समीचीनां सोपानपरम्परां यां कृतिं विपश्चिदपश्चिमेभ्य उपायनीकृत्यात्मनः कृतकृत्यतां कर्त्तुं कामये, सा किल कृतिः '*त्रिवेणिका*' पदेन व्यपदिश्यते ।

अयं किल वृत्तिविवेचनात्मकस्त्रिवेणिकापरनामधेयः कलितलघुकलेवरो ग्रन्थः, तस्य *कोविदानन्दस्य* संक्षिप्तोंऽशो यं *श्रीमदाशाधर भट्टः* प्राक् प्रथितवान् तदनु एनम् । यतो हि अस्मिन् ग्रन्थे 'विस्तरस्तु *कोविदानन्दे* द्रष्टव्यः' 'कोविदानन्दस्थक्रमेणोदाह्रियते' इत्यादीनि भूयांसि वाक्यानि तत्र तत्र निबद्धानि समुपलभ्यन्ते । *श्रीमदप्पयदीक्षितकृतकुवलयानन्दस्य* प्रकृतग्रन्थकृत्कृतायामलङ्कारदीपिकाभिधायां टीकायामपि 'अन्यत् कोविदानन्दे द्रष्टव्यम्' इत्यादि वचो भूरि भूरि दृश्यते । परन्तु कोविदानन्दे अनयोर्ग्रन्थटीकयोर्निर्देशो नास्तीति कोविदानन्दस्य प्राथम्यं तत्संक्षेपीकरणस्य चास्य द्वितीयत्वम् । किं बहुना ग्रन्थकृत् स्वयमपि कोविदानन्दं विद्वत्तमेभ्य उपायनीकृत्य भूयो गौरवमावहति, प्रचारञ्चेच्छतीति अस्य ग्रन्थस्य मङ्गलेन प्रतीयते—

प्रणम्य पार्वतीपुत्रं कोविदानन्दकारिणा ।
आशाधरेण क्रियते पुनर्वृत्तिविवेचना ॥

अस्मिन् *कोविदानन्दे* वृत्तिरियं ससमारम्भं सविस्तरं च लक्ष्य-लक्षणवत्यां छन्दोमय्यां भाषायां कारिकापद्धत्या निरूपिताऽस्ति । तत्र पदानां स्फुटता, अर्थानामगुरुता, विवक्षितार्थस्य विशदता, अखिलमिदं पण्डितपुङ्गवानामपि चेतसश्चमत्कृतिं जनयतीति कैः शब्दैः स्वोल्लासं प्रकटयामि । तथा चोक्तं ग्रन्थकृता—

"प्राचां वाचां विचारेण शब्दव्यापारनिर्णयम् ।
करोमि कोविदानन्दं लक्ष्यलक्षणसंयुतम् ॥

अस्य ग्रन्थस्य स्वयं ग्रन्थकृता 'कादम्बिनी' नाम्नीं टीकां विरच्य कुत्रचिन्निगूढः कश्चन विशिष्टो विषयः प्रकाशितः । मन्ये, कारिकावलीं मुक्तावलीं च विदधतो विश्वनाथपञ्चाननभट्टाचार्यस्य यशोऽभिलषितं भवेद् ग्रन्थकृता । यद्यपि ग्रन्थानां ग्रन्थकर्त्तॄणां सूच्यां ( Catalogus catalogorum ) "कोविदानन्दस्त्रिवेणिकायामुद्धृतो वर्तते" ( Quoted in त्रिवेणिका ) इत्येव सूचितमस्ति । परन्तु अष्टविंशतिपत्रात्मकः सप्तशतश्लोकप्रमाणको[१] व्याकरणविभागे *महाराजसयाजीराव विश्व-विद्यालय-प्राच्यविद्यामन्दिरे* समीचीनां परिस्थितिमाकलयन् हस्तलिखित-रूपोऽयं[२] कोविदानन्दग्रन्थः स्वकीयमुद्रणार्थं संस्कृतसाहित्यं समुद्धर्तुं यतमानानां मनीषिणां मुखानि प्रतीक्षते । अयं ग्रन्थः साद्यन्तो मया

---

१. प्रायो गुर्जरप्रान्ते विशेषतो जैनसम्प्रदाये ग्रन्थप्रमाणज्ञानस्येयं रीतिर्यत्—अनुष्टुभा छन्दसा निबद्धे श्लोके द्वात्रिंशदक्षराणि भवन्ति, प्रतिद्वात्रिंशदक्षरैरेकैकं श्लोकं विभज्य यावन्तः श्लोका भवेयुः ते ग्रन्थस्य प्रमाणम् । तदेवात्रापि ज्ञेयं न तु येन केन छन्दसा निबद्धास्तावन्तः श्लोका सन्तीति भावः ।

२. Serial No. 84. Accession No. 1535, Leaves 28, Granthas 700 Subject व्याकरणशास्त्रम् ।

पर्यवेक्षितो मतश्च, यदि प्रकाशयतां गमिष्यति तदा वस्तुतो महार्हग्रन्थरत्नप्रकाशनवत् संस्कृतसाहित्यं भृशमुपकृतं भविष्यतीति दृढं विश्वसिमि।

## सन्दर्भनामधेयविमर्शः

व्यपदेशोऽयं चेतसि चमत्कृतिमादधानोऽभिप्रायविशेषं भजन् नितरामनुरूपतामावहति। केशपाशाद्यनेकार्थेषु शक्तमपि वेणीपदमस्मिन् प्रसङ्गे प्रवाहेऽर्थे प्रबन्धकृता प्रयुक्तं प्रतिभातीति नास्ति लेशतोऽपि विप्रतिपत्तिर्विदुषाम्। 'ओघः, प्रवाहो, वेणी च' इति हलायुधः। कालिदासप्रयोगोऽपि—"प्रासादजालैर्जलवेणिरम्यां रेवां यदि प्रेक्षितुमस्तिकामः" (रघु० ६ सर्ग० ४३ श्लोक०)। जह्नुकन्याकलिन्दगिरिकन्यासरस्वतीनां प्रयागे यः सङ्गमः, स एव त्रिवेणीपदेन शास्त्रेषु लोकेषु च व्यवह्रियते। अत एव प्रयागस्तीर्थराजत्वेन विश्वस्मिन्नपि विश्वे विश्रुतो वर्तत इति विदितमेव प्रेक्षावताम्। यथा प्रयागेऽखिलप्राणिनिवहस्य दुरितदलदलनपटूनां गङ्गायमुनासरस्वतीनां सङ्गमः, तथैवात्र ग्रन्थे अभिधालक्षणाव्यञ्जनानां तिसृणां वृत्तीनां विशदविवेचनसमवायः प्रत्यक्षीक्रियते। एवञ्च त्रिवेणीसादृश्यात् कृतिरियमपि त्रिवेणिकाऽभिधीयते। तथा चोक्तं सन्दर्भकृता—

शक्तिभक्तिव्यक्तिगङ्गायमुनागूढनिर्झराः।
प्रवाहवत्यः सन्त्यत्र यत्तदेषा त्रिवेणिका॥ इति। (पृ० २)

अत्र न केवलं सादृश्यप्रतियोगितावच्छेदकव्यापकीभूता त्रिपथगाकालिन्दीसरस्वतीसमवेता त्रित्वसङ्ख्यैवोक्तसरितात्रयप्रतियोगिकवृत्तित्रयानुयोगिकसादृश्यस्य नियामिका। किन्तु अपरेऽपि विशिष्टा धर्माः सादृश्यनियामकाः सन्तीति परितः पर्यालोकनेन प्रतीयते। यथा विमलतोयायां भागीरथ्यां शमनस्वसा सरस्वती च समन्वित इति तयोस्तत्राश्रयभूता भगवती भागीरथी। एवं वृत्तिद्वयमनपेक्षमाणत्वेनाविलम्बितार्थप्रतीतिजनिकाऽमलात्माऽभिधा लक्ष्यव्यङ्ग्यप्रतीतावपरयोर्द्वयोर्वृत्त्योराश्रयो भवतीति अभिधा गङ्गया तुलिता। नीलनीरा यमुना गङ्गाश्रिता, मुख्यार्थबाधग्रहपूर्विका विलम्बितार्थप्रतीतिजनिका मलिना लक्षणेति

तयोरुपमानोपमेयभावः। प्रयागे सङ्गमस्थले सरस्वती नितरां निगूढा योगिनोऽन्तरा न हि सर्वैः साक्षात् कर्त्तुं शक्यते। शास्त्रप्रामाण्यात् तस्या अस्तित्वे न चास्तिकाः सन्दिहानाः सन्ति। व्यङ्ग्योऽपि सुतरां रहस्यभूतः काव्यवासनापरिणतधीभिरेवावगन्तुं शक्यते। तस्यास्तित्वेऽलङ्कार-शास्त्रवासनावासितान्तःकरणानां मनागपि संशीतिर्न भवति इति सर-स्वत्या व्यञ्जनोपमीयते। अतोऽन्वर्थनामधेया कृतिरियं 'त्रिवेणिका' इति॥ अत एव तिसृणां वेणीनां समाहारस्त्रिवेणि, त्रिवेणीव त्रिवेणिका। अथवा तिस्रो वेण्यो यस्याः सा त्रिवेणी, त्रिवेण्येव त्रिवेणिका इति ग्रन्थकृता स्वयमेवोक्तमिति। (पृ० २)

## अस्य सन्दर्भस्य कस्मिन् शास्त्रेऽन्तर्भावः?

यद्यपीयं किल त्रिवेणिका कृतिः शब्दशास्त्रं विषयीकरोति, आहो-स्वित् अलङ्कारशास्त्रम्! इति विचिकित्सा तत्त्वं विचेतुं मनागपि मनो न मुञ्चति। यतो हि कतिपयकमनीयवाक्यकलितकलेवरे निबन्धेऽस्मिन् वृत्तिरेव विवृता विलोक्यते विवेकवरैः। सन्दर्भसम्पादकेनापि तथैव मङ्गलावसरे प्रतिश्रुतम् "आशाधरेण क्रियते पुनर्वृत्तिविवेचना" इति। अलङ्कारशास्त्रेऽभिधादीनां वृत्तीनां विवेचनं प्रायः प्राधान्येनाक्षिलक्ष्यी-भवति। शाब्दिकशार्दूला अपि शब्दशास्त्रे तस्मिंस्तस्मिन्नवसरे महता-टोपेन परपरीतसिद्धान्तपरेतां वृत्तिं विवृण्वन्तः सुमनसां मानसानि समुल्लासयन्तीति विदन्ति विद्वेषविरहिता विद्वांसः। एवञ्च वृत्तिविवेच-नस्य व्याकरणालङ्कारशास्त्रयोः समानमानार्हत्वेन 'किं विषयकोऽयं ग्रन्थः' इति विचिकित्सा प्रभवति केषाञ्चिदपि विद्यावदातान्तःकरणानां चेत-स्तले। अथ च कासु चन हस्तलिखितप्रतिषु 'व्याकरणशास्त्रं' कासु चन च 'अलङ्कारशास्त्रम्' इति विषयोल्लेखावसरे तत्तत्सूचीकारैर्विद्वद्भिरङ्कितं नयनगोचरीभवति।

नन्वियं संशीतिर्मीमांसाशास्त्रवृत्तिविषयतानिरूपिता, न्यायशास्त्र-वृत्तिविषयता चापि भवतु, कथमेतावान् पक्षपातो भगवत्याः संशीतेर्द्वयोः!

इति नूनमत्तप्रलपितमिव 'मुखमस्तीति वक्तव्यं दशहस्ता हरीतकी' इति न्यायमलङ्करिष्यति मेधाविनामभिमुखम्। यतो मीमांसाशास्त्रे नामतोऽप्यश्रूयमाणाया न्यायशास्त्रे च तत्र तत्र सन्दर्भेऽनुमानेऽन्तर्गमय्य प्रबलं प्रत्याख्यातायाश्च व्यञ्जनाया अत्र निबन्धे महताऽऽटोपेन न केवलं साधु समर्थनं सुधियां धियमावर्जयति प्रत्युत तद्विरुद्धवचसां सुमनसां वाचो युक्तेः प्रत्याख्यानं भीतिमुत्पादयति। मन्ये, न्यायशास्त्रपरमाचार्योऽन्वर्थाभिधानोऽकलितमहिमा भट्टमहिमा तु (महिमभट्टः) व्यञ्जनां प्रत्याख्यातुमेव जनिमवनितले लेभ इति व्यक्तिविवेकं पश्यतां तत्रभवतां विपश्चितां प्रतिपदमेव प्रतीयेत। तथापि त्रिवेणिकाग्रन्थस्यालङ्कारशास्त्रविषयकत्वे संशीतिर्मनागपि मनीषिणां मतिं न स्पृशेदिति कोऽपि वक्तुं पारयेत्। यतः शब्दशास्त्रे महताऽऽटोपेन लक्षितापि लक्षणा 'जघन्या वृत्तिः' इति प्रत्याख्याता, उपेक्षिता वा मञ्जूषादौ भूरि भूरि भवति नयनातिथिः। एवं व्यञ्जनापि नागेशेनाङ्गीकृतापि प्राचीनैः शाब्दिकैः भृशमुपेक्षिता आलङ्कारिकैः भेदप्रभेदैः सर्वशक्त्या समर्थिता तत्र तत्र दृश्यत इत्येतत्तत्त्वमग्रे स्फुटीभविष्यति।

त्रिवेणिकायाञ्चास्यां व्यञ्जना सपरिवारा प्रलपिता दृष्टिपथमलङ्करोतीति अलङ्कारशास्त्रविषयकोऽयं सन्दर्भ इति प्रतिपादयितुं नास्ति मनसो मनागपि संकोचः।

अथवाऽलङ्कारशास्त्रं व्याकरणशास्त्रस्य पुच्छभूतमिति व्याकरणशास्त्रविषयकत्वेऽप्यस्य ग्रन्थस्य न काचनापि विप्रतिपत्तिः स्यात् प्रेक्षावताम्। अत एवाप्ता वदन्ति—'इदमलङ्कारशास्त्रं व्याकरणशास्त्रस्यैव परिशिष्टो भागः' इति, 'व्याकरणशास्त्रस्यैव पुच्छभूतमिदं शास्त्रम्' इति च।

## अलङ्कारशास्त्रस्य व्याकरणशास्त्रपुच्छभूतत्वम्

शब्दानां विषये त्रयी विधा प्रायेण प्रवर्तते १ अन्वाख्यानम्, २ प्रयोगनियमः, ३ प्रयोगनिषेधश्च। तत्र शब्दशास्त्रं शब्दानन्वाचष्टे। अप्शब्दो जलार्थनिरूपितशक्तिमान् नित्यबहुवचनान्त एव साधुः, आनुपूर्व्यर्थनिरू-

पितशक्तिमान् एकवचनान्तः साधुः । अत एव "अपो भि" इत्यत्रैकवचनं संगच्छते । लोमवल्लाङ्गूलार्थनिरूपितशक्तिमान् गोशब्दः साधुः, तदर्थनिरूपितशक्तिमन्तो गाव्यादयः शब्दा असाधवः । अत एव भगवता भाष्यकारेणोक्तम्-'अथ शब्दानुशासनम्' इति । अनुशासनं नामान्वाख्यानम् । शब्दशास्त्रेणानुशासितानां शब्दानां प्रयोगनियमः प्रयोगनिषेधश्चानेन शास्त्रेण सम्पाद्यते । यथा कार्तार्थ्यमिति कर्णकटुः शब्दो विदग्धैर्वीरादिरसे एव प्रयोक्तव्यो न तु शृङ्गारादौ रसे ।२ प्रयोगनिषेधो यथा पुंस्याम्नातोऽपि पद्मशब्दो विदग्धैः 'भाति पद्मः सरोवरे' इति न प्रयुज्यते । एवं रणितक्वणितशिञ्जितगुञ्जितादिशब्दः क्रमेण मञ्जीररशनाघण्टाभ्रमरादिध्वनिष्वेव प्रयोज्या नान्यत्र । अत एव भट्टिकविः—

'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तादर्श इवान्धानां भवेद् व्याकरणादृते ।' (२२सर्ग ३३ श्लो०)

इत्यनेन साहित्यशास्त्रस्य जीवातुभूतालङ्कारादिप्रदर्शकस्यापि स्वकाव्यस्य शाब्दिकैकादरणीयत्वं निर्दिष्टवान् । 'य एव व्याकरणमधीतवान् तस्यैवात्र काव्ये आदरो युक्त इति दर्शयन्नाह—'दीपतुल्य इत्यादि, इत्यवतरणवाक्यमपि जयमङ्गलेन प्रदर्शितम् । अलङ्कारशास्त्रस्य व्याकरणशास्त्रपरिशिष्टत्वादेव शाब्दिकशिरोमणिना भट्टिकविना व्याकरणप्रयोगोदाहरणप्रयोजनकेऽस्मिन् भट्टिकाव्ये तृतीये प्रसन्नकाण्डे शब्दार्थालङ्काराणां माधुर्यादिगुणानाञ्च कृतमुपादानं संगच्छते । अन्यथा तदप्रासङ्गिकत्वं केन वारयितुं शक्येत ? एवञ्चालङ्कारशास्त्रस्य शब्दशास्त्रपुच्छभूतत्व ब्रह्मणाऽपि वारयितुं दुःशकम् । यद्यपि पुच्छभूतत्वे सिद्धान्तसाम्यादयोऽनेका वाचो युक्तयो जाग्रतितमां तथापि विस्तरभयान्नेह वितन्यते, तेषु तेष्वाकरग्रन्थेषु तास्ता दृष्ट्वा सन्तोषमेष्यन्ति सुधिय इति वामनाचार्यः ।

अहो ! किमिदमलङ्कारपदप्रवृत्तिनिमित्तम् ? येन ध्वन्यादिनिरूपणपरकेऽपि शास्त्रे 'अलङ्कारशास्त्रम्' इति व्यवहारो विहित आप्तैरपि दृश्यते तत्रातत्र । यद्यप्यस्य 'अलङ्कार' इति नामधेयं सुधियां धियं सम्यङ् नावर्जयति तथापि प्राक्तनत्वेऽस्य न कोऽपि मनीषी सन्दिहीत । परमपुरातनैरा-

लङ्कारिककुलालङ्कारभूतैः श्रीमद्भिभर्महाचार्यपादैः स्वग्रन्थः 'काव्यालङ्कार' इति पदेनैव व्यपदिष्टः। मन्ये, अभिधानमिदं तस्य युगस्यास्ति यस्मिन् युगे काव्येऽलङ्कारा एव प्राथम्यं लभमानाः सर्वातिशायिनीमुपादेयतां भजन्ते स्म। परन्तु विवरणकारा विवृण्वन्ति—'नायमलङ्कारशब्दः अलङ्क्रियतेऽनेनेति करणसाधनो यमकोपमाप्रतिपादकः'अलङ्कृतिरलङ्कारः इति भावसाधनो दोषनिरासगुणालङ्कारसंकलनसम्पादितसौन्दर्यपरः तद्विषयकत्वादुपचाराद् ग्रन्थोऽपि अलङ्कारः। अथवा 'अर्शआदिभ्योऽच्' इति अजन्तोऽलङ्कारशब्दो गौणवृत्तिं विनाऽपि ग्रन्थे प्रयोक्तुं युज्यते। अत्रोपोद्वलकञ्च वामनसूत्रम्—'काव्यं ग्राह्यमलङ्कारात्' १॥ 'सौन्दर्यमलङ्कारः॥ २॥ अलङ्कृतिरलङ्कारः। करणव्युत्पत्त्या पुनरलङ्कारशब्दो यमकोपमादिषु वर्तते। स दोषगुणालङ्कारहानोपादानाभ्याम्॥ ३॥ स खलु अलङ्कारो दोषहानात् गुणालङ्कारयोरादानाच्च सम्पाद्यः कवेः" इदमत्राकूतम्—श्रीवामनाचार्यमते शब्दार्थयोः शोभासम्पादकं कटककुण्डलादिस्थानीयं बाह्यमुपकरणमात्रमलङ्कारपदवाच्यं नास्ति, प्रत्युत सौन्दर्यापरपर्यायः काव्योपादेयताधायकः कश्चनान्तरो धर्मः। एवञ्च काव्यसौन्दर्यसम्पादकानां समीहितानां समेषां साधनानां प्रतिपादकं शास्त्रमलङ्कारशास्त्रमिति 'अलङ्कार' पदस्य व्यापको व्यपदेशः।

केचित्तु—यथा प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थान-रूपाणां षोडशपदार्थानां प्रतिपादकमपि गौतमशास्त्रं परार्थानुमानस्य न्यायस्य सकलविद्यानुग्राहकतया सर्वकर्मानुष्ठानसाधनतया च तत्र शास्त्रे प्रधानत्वेन न्यायशास्त्रमिति व्यपदिश्यते "प्राधान्येन व्यवदेशा भवन्ति" इति न्यायात् तद्वत् दोषगुणादीनां प्रतिपादकमपि इदं शास्त्रं यमकोपमादीनामलङ्काराणां भूयोविषयकतया काव्यव्यवहारप्रयोजकतया चात्र शास्त्रे प्रधानत्वेन तत्प्रतिपादकत्वादेवालङ्कारशास्त्रमिति व्यपदिश्यते। अलङ्काराणां काव्यव्यवहारप्रयोजकत्वं च "काव्यवृत्तेस्तदाश्रयात्" इति ग्रन्थेन ध्वनिकारोक्तं पञ्चमोल्लासे ( २१३ पृष्ठे ) मम्मटभट्टैरेव प्रति-

पादितम् । व्याख्यातं च तत्रैवोद्योतकारैः "काव्यवृत्तेरिति । काव्यपद-वृत्तेरित्यर्थः सालङ्कारत्वस्य काव्यलक्षणघटकत्वादिति भावः । यद्वा काव्य-वृत्तेः काव्यनिष्पत्तेरित्यर्थः । अलङ्कारकृतचारुत्वेनैव शब्दार्थयोः काव्यत्व-निर्वाहादिति भावः' इति । एवमेव चक्रवर्तिभट्टाचार्यप्रभृतिभिरपि व्या-ख्यातमिति तत्रैव द्रष्टव्यम् । किञ्चाष्टमोल्लासे (४७२ पृष्ठे) मम्मट-भट्टैः स्वयमप्युक्तम् ।

स्वर्गप्राप्तिरनेनैव देहेन वरवर्णिनी ।
अस्या रदच्छदरसो न्यक्करोतितरां सुधाम् ॥

इत्यादौ विशेषोक्तिव्यतिरेकौ गुणनिरपेक्षौ काव्यव्यवहारस्य प्रवर्तकौ इति । अपि च दशमोल्लासेऽपि (७०६ पृष्ठे) भामहोक्तं स्वयमुप-पादितम् । "अविरलकमलविकाशः" इत्यत्र काव्यरूपतां कोमलानुप्रासम-हिम्नैव समाम्नासिषुर्न पुनर्हेत्वलङ्कारकल्पनया" इति ।

वस्तुतस्तु अलङ्कारशास्त्रमिति व्यपदेशे बीजं वयं तत्त्वत इत्थं विद्मः । तथाहि—ये दण्डिभामहभट्टोद्भटरुद्रटवामनान्ताः प्राञ्चोऽलङ्कारशास्त्र-प्रणेतारो बभूवुस्तैर्ध्वन्यमानमर्थं वाच्योपस्कारकतयालङ्कारपक्षनिक्षिप्तं मन्यमानैः "अलङ्कारा एव काव्ये प्रधानम्' इति सिद्धान्तितम् । अतस्त-दानीं "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायेन तच्छास्त्रस्यालङ्कार-शास्त्रमिति व्यपदेशः सप्रमाण एवासीत् । ततस्तेभ्योऽर्वाचीनैर्गूढविचार-शालिभिरानन्दवर्द्धनाचार्यैर्ध्वन्यालोकाख्यस्वप्रणीतप्रबन्धे ध्वन्यमान-स्यैवार्थस्य गुणालाङ्करोपस्कर्त्तव्यत्वेन प्राधान्ये संस्थापिते अलङ्काराणां प्राधान्याभावेऽपि तत्प्रबन्धस्य प्राचीनव्यपदेशप्रणाल्यनुसारेणालङ्कार-नाम्नैव व्यपदेशः प्रचरति स्म । ततो मम्मटोपाध्यायेनात्र शास्त्रे अष्ट-मोल्लासे (४६२ पृष्ठे) "ये रसस्याङ्गिनो धर्माः" इत्यादिना "शब्दार्थौ काव्यस्य शरीरं गुणा रसस्य साक्षादुत्कर्षकाः, अलङ्कारास्तु शब्दार्थरूप-काव्यशरीरोत्कर्षद्वारा रसस्यैवोत्कर्षकाः रसश्चात्मस्थानीय" इति सिद्धान्तितया रसः शरीरेष्वात्मवत्काव्ये प्राधान्येन स्थित इति प्रागुक्त-

न्यायेनास्य शास्त्रस्येदानीं' यद्यपि रसशास्त्रमिति व्यपदेशो युक्तः तथापि स एव प्राक् प्रचारमुपगतो व्यपदेशोऽद्यावधि तथैव प्रचरतीत्याहुः।

परे तु एवमङ्गीकारे वाग्देवताऽवताराणां श्रीमम्मटभट्टादीनां 'गतानुगतिकत्वकलङ्कपङ्कलेपनकर्मत्वं स्यात्। ( लकीर के फकीर ) "प्राधान्येन व्यपदेशा भवन्ति" इति न्यायात् न्यायशास्त्रनाम्नो दृष्टान्तीकरणमापाततो रमणीयम्। न्याये सकलविद्यानुग्राहकत्वसकलकर्मानुष्ठानसाधनत्वरूपप्राधान्यप्रतिपादनेन, अत्र च भूयोविषयकत्वकाव्यव्यवहारप्रयोजकत्वरूपप्राधान्यप्रतिपादनेन दृष्टान्तदार्ष्टान्तयोर्महावैषम्यात्। ध्वनिमपेद्यालङ्काराणां भूयोविषयकत्वेऽपि गुणदोषावपेक्ष्य तत्रापि विशेषतो दोषमपेक्ष्य भूयोविषयकत्वं नैव स्यात्, कुकविकृतकाव्यानां भूयस्त्वात्। अलङ्कारस्य काव्यव्यवहारप्रयोजकत्वसमर्थनमपि भामहोद्भटरुद्रटाभिमतालङ्कारसम्प्रदायानुरोधेनेतरेषु सम्प्रदायेषु कृपाकटाक्षाभावात् एकदेशि। भरताचार्य्याभिप्रेते रससम्प्रदाये, दण्डिवामनाङ्गीकृते गुणसम्प्रदाये, कुन्तककलितवक्रोक्तिसम्प्रदाये, आनन्दवर्धनाभिनवगुप्तगुप्ते ध्वनिसम्प्रदाये, क्षेमेन्द्ररक्षिते औचित्यसम्प्रदाये यथाक्रमं रसादीनामेव काव्यव्यवहारप्रयोजकत्वम्। अत एव "वाक्यं रसात्मकं काव्यम्" इति लक्षयता विश्वनाथेन 'तेन ( रसेन ) विना तस्य काव्यत्वानङ्गीकारात्' 'यत्तु नीरसेष्वपि गुणाभिव्यञ्जकशब्दार्थसद्भावाद् दोषाभावादलङ्कारसद्भावाच्च काव्यव्यवहारः, स ( व्यवहारः ) रसादिमत्काव्यबन्धसाम्याद् गौण एव ( परि० १ ) इति चोक्तम्। बालबोधिन्यां श्रीझलकीकरमहोदयोऽपि काव्यस्य षड् भेदान् प्रदर्शितवान्—"इदमत्र निष्पन्नम्—१ सरसं स्फुटालङ्कारसहितम्। २ सरसमस्फुटालङ्कारसहितम्। ३ सरसमलङ्कारशून्यम्। ४ नीरसं स्फुटालङ्कारसहितम्। ५ नीरसमस्फुटालङ्कारसहितम्। ६ नीरसमलङ्कारशून्यम्।" अग्रे चोक्तम् 'अत्र मम्मटमते प्रथमद्वितीयचतुर्थपञ्चमानां काव्यत्वम्। प्रदीपमते आदितश्चतुर्णां काव्यत्वम्। यदित्वित्यादिमते प्रथमद्वितीयचतुर्थनामेव

काव्यत्वम्'' इति ( काव्य० बाल० उल्ला १ पृ० १७ )। एवञ्च मतभेदेनालङ्कारशून्येऽपि काव्यत्वस्वीकारेणालङ्काराणामिव रसादीनामपि काव्यव्यवहारप्रयोजकत्वोदाहरणन्तु मम्मटस्य स्वमत एव बोध्यम्। अलङ्कारशून्ये तेन काव्यत्वानङ्गीकारात्। तस्माद् रसादिसम्प्रदायेऽलङ्कारस्यैव काव्यव्यवहारप्रयोजकत्वानङ्गीकारात् साहित्यशास्त्रस्य 'अलङ्कारशास्त्र' इत्यभिधाने वामनोक्तं विवरणकारोद्धृतमेव समीचीनतममेवेत्यलमविचारणीयवृद्धचरितचर्चयेत्याहुः।

अलङ्कारशास्त्रपदवाच्यानां निबन्धानां परिशीलनशालीनमतीनां विदितचरमेव यदत्रानेके सम्प्रदाया आत्मलाभं लभमाना दृश्यन्ते। अनेनैवास्य शास्त्रस्य लोकप्रियत्वं प्रकाश्यते। समेऽप्यालङ्कारिककुलावतंसाः काव्यस्यात्मस्वरूपनिर्वचनपरा एव प्रेक्षावतां दृष्टिमभिनन्दयन्ति। किन्तत् तत्त्वम्, यस्मिन् सति काव्यत्वेनाभिमते वस्तुनि काव्यत्वं भवेत्? "आवश्यकताऽऽविष्कारजननी''ति न्यायात् उपरि निर्दिष्टाः सम्प्रदायाः समाधातुमिदमुदपद्यन्त। रसादींश्च कव्यात्मभूतानमन्यन्त। तथा चोक्तम्—अलङ्कारसर्वस्वटीकाकारेण समुद्रबन्धेन—"इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यं धर्ममुखेन, व्यापारमुखेन, व्यङ्ग्यमुखेन वेति त्रय पक्षाः। आद्येऽप्यलङ्कारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोगकृत्त्वेन वेति द्वैविध्यम्, इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरङ्गीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन पञ्चम आनन्दवर्धनेन' इति। अयमाशयः—धर्ममूलकवैशिष्ट्यस्य द्वौ भेदौ, नित्योऽनित्यश्च। नित्या गुणाः अनित्या अलङ्काराः इति तत्तात्पर्यम्। एवञ्च धर्ममूलकवैशिष्ट्यस्य प्रतिपादकौ द्वौ सम्प्रदायौ गुणसम्प्रदायोऽथवा रीतिसम्प्रदायः, अलङ्कारसम्प्रदायश्च। व्यापारमूलकवैशिष्ट्यस्यापि प्रकारद्वयं—वक्रोक्तिः, भोजकत्वञ्च। वक्रोक्तिसम्प्रदायस्याचार्यः कुन्तकः, भोजकत्वव्यापारकल्पको भट्टनायकः। परन्तु सम्प्रदायान्तरत्वेनेदं संकलयितुं सुधियो न सम्मन्यन्ते यतो हि

"विभावानुभावसञ्चारिसंयोगाद् रसनिष्पत्तिः" इति भरताचार्यसूत्रं विवरीतुकामो भट्टनायको नव्यममुं भोजकत्वव्यापारं कल्पितवानिति रससम्प्रदाय एवान्तर्भावयितुं साम्प्रतम्।

समीक्षाशालीनशेमुषीको राजशेखरस्तु "शब्दार्थौ सहितौ काव्यम्" इत्याचार्यभामहसूत्रमनुसन्धाय सम्प्रति अलङ्कारशास्त्रत्वेनाभिमतं शास्त्रं 'साहित्यविद्या' इत्यभिहितवान्। अस्याः कल्पनाया अभिनन्दकेषु आचार्यकुन्तकः परमं पदं भजते। अद्यत्वे भूयांसो विद्वांसः शास्त्रमिदं 'साहित्यशास्त्रमि'ति सम्बोधयन्ति। वस्तुत इदमेवाभिधानं समीचीनमिति समीक्षावन्तो विदाङ्कुर्वन्तु। पुरातनी संज्ञा त्वस्य 'क्रियाकल्प' इत्यासीदिति प्रतीयते तस्य तस्य सन्दर्भस्य समालोचनेन। *महर्षिवात्स्यायनः* कामसूत्रे ( १। ३। १६ ) चतुष्षष्ठिषु कलासु 'क्रियाकल्पमपि अन्यतमां कलां कलितवान्। 'क्रियायाः—काव्यग्रन्थस्य, कल्पः—विधानम्'। एवञ्चेदं प्राचीनतमं क्रियाकल्पम्' इत्यभिधानं प्रसिद्धिपरम्परां न प्राप्तमित्यत्र कारणकलापं मृगयन्तु मेधाविन इत्यलमप्रस्तुतप्रशंसया।

## सम्प्रति सन्दर्भप्रतिपाद्यो विषयो विमृश्यते

लघुकलेवरे निबन्धेऽस्मिन् विक्रियमाणा वृत्तिरेवाक्षिलक्ष्यीभवति। यद्यपि वृत्तिशब्दोऽनेकत्रानेकेष्वर्थेषु व्यवह्रियमाणो दृश्यते। तथाहि—व्याकरणे "कृत्तद्धितैकशेषसनाद्यन्त धातुरूपाः पञ्च वृत्तयः" प्रायो दर्शनेषु यथा "तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथाऽन्तःकरणमपि चक्षुरादिद्वारा घटादिदेशं गत्वा घटाद्याकारेण परिणमति। स एव परिणामो 'वृत्तिः' इत्युच्यते। कुत्र चित् सूत्राणां व्याख्यानेऽपि वृत्तिशब्दः प्रयुज्यते। व्यवहारेऽपि वृत्तिशब्दो भूरि भूरि व्यवह्रियते" तथाप्यत्र शब्दस्य तस्मिन् सामर्थ्यरूपे व्यापारे वृत्तिशब्दप्रयोगोऽभिमतो येन ज्ञातेनार्थाः झटिति बुद्धिमधिरोहन्ति। अयञ्च व्यापारः सम्बन्धपदेनाप्यभिधीयते। इदमत्राकूतम्—अथ श्रुतिमन्तः सङ्ख्यातीतान् शब्दान् प्रतिदिनं शृण्वन्ति, परन्तु

सम्यक् श्रुता अपि समे शब्दाः प्रत्येकं नैव सर्वानर्थान् बोधयन्ति, अपि तु केचनैव कांश्चिदेव क चनैव । यथा साधु श्रुतादपि घटशब्दात् कम्बुग्रीवादिमदर्थव्यक्तेरेवावगमो भवति न तु प्रवाहस्य नापि पटस्येति घटशब्दस्य कम्बुग्रीवादिमदर्थेन कश्चन सम्बन्धो वर्तते न प्रवाहेण नापि पटेनान्यथा तावपि प्रबोधयेत् । एवञ्च शब्दार्थयोः परस्परं कश्चन सम्बन्धो वाच्यो, येन शब्दः सम्बद्धमेवार्थं प्रकाशयति नासम्बद्धं प्रदीपवत् इति कल्प्यते । परन्तु एवं सति शब्दानां समवायेनाकाशस्य सम्बद्धत्वात् 'शब्दाश्रयत्वमाकाशत्वम्' इति नयात् घटादिपदेन एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयतीति आकाशस्यापि बोधः स्यात् । स च नेष्टः, तादृशस्य बोधस्याननुभवात् इति पदपदार्थयोः समवायादिविलक्षणः कश्चन सम्बन्धः कल्प्यः । स च ज्ञात एवापेक्ष्यते नाज्ञातः । अन्यथाऽज्ञातेऽपि तस्मिन्नर्थबोधः स्यात् । अयमेव सम्बन्धो वृत्तिपदेन शब्दव्यापारादिपदेन चोच्यते । एवञ्च शाब्दबोधौपयिकः सम्बन्धः, अर्थप्रतियोगिकः पदानुयोगिकः, पदप्रतियोगिकोऽर्थानुयोगिको वा सम्बन्धो वृत्तिः । अथवा वृत्तिपदव्यवहार्यत्वं वृत्तित्वमिति । येन शब्दव्यापारेण झटित्यर्थबोधो भवति सोऽभिधाख्यव्यापार इत्युच्यते । भट्टलोल्लटादयः अभिधारूपामेकविधामेव वृत्तिं मन्वते, तयैव सर्वविधस्याप्यर्थस्य बोधो भवति । तेषामयमभिप्रायः—यथा बलवता प्रेरित एक एव इषुरेकेनैव वेगाख्येन व्यापारेण रिपोर्वर्मच्छेदं मर्मभेदं प्राणहरणं च विधत्ते तथा सुकविप्रयुक्तः एक एव शब्दः एकेनैवाभिधाख्यव्यापारेण पदार्थोपस्थितिमन्वयबोधं व्यङ्ग्यप्रतीतिं च विधत्ते । अतो नास्ति वाच्यत्वादन्योऽर्थस्तेषामिति । तथा चोक्तं काव्यप्रकाशे—'सोयमिषोरिव दीर्घदीर्घतरो व्यापारः' इति । ( काव्य प्रकाशः, ५ उल्लासः पृष्ठ २२५ ) । कतिपये विद्वांसः 'गङ्गायां घोषः' इत्यादौ भगीरथखातावच्छिन्नार्थं प्रत्याय्य विरतव्यापाराया अभिधाया गतेरभावात् तीरबोधो न स्यादिति शब्देऽभिधाख्यव्यापारादन्यमपि लक्षणाख्यव्यापारं मन्वते । तेष्वेकतमे नैयायिकाः ।

गौतमोऽप्याह—"सहचरण--स्थान-तादर्थ्य-वृत्त-मान-धारण-सामीप्य-योग-साधनाधिपत्येभ्यो ब्राह्मण-बाल-कट-राज-सक्तु-चन्दन-गङ्गा-शकटान्न-पुरुषेष्वतद्भावेऽपि तदुपचारः" ( न्या० द० अध्या० २ आह्नि० २ सूत्र ६३) तस्य भावः–तद्धर्मः, तदभावेऽपि तदुपचारः–तच्छब्दव्यवहारः। स च तद्धर्मारोपेण। आरोपनिमित्तानि च सहचरणादीनि। इति।

## तार्किकमतेन शक्तिस्वरूपविचारः

वृत्तिर्द्विधा--संकेतलक्षणान्यतररूपेति । तथा चोक्तं शक्तिवादे "संकेतो लक्षणा चार्थे पदवृत्तिः" इति। एवञ्च तत्तत्पदेन जायमानेऽर्थ-बोधे तत्तत्पदवृत्तेर्वृत्तेर्ज्ञानात् पदार्थोपस्थितिरन्वयव्यतिरेकाभ्यां कारण-मिति वृत्तिज्ञानाभावे श्रुतोऽपि शब्दो नार्थबोधं जनयति। घटपदादेश्चा-काशादौ वृत्तेरेवाभावात् नैव तद्विषयको बोधः। अत एव वृत्त्या पद-प्रतिपाद्य एव पदार्थ इत्यभिधीयते। तत्र 'अस्माच्छब्दादयमर्थो बोद्धव्यः' इत्यत्र समीपवर्तिबोधकेनेदमोच्चारणकर्मीभूतं परामृश्यते, तस्याभेद-सम्बन्धेन शब्देऽन्वयः, शब्दपदोत्तरपञ्चम्या जन्यत्वमर्थः, तत्र शब्दस्य निरूपितत्वसम्बन्धेनान्वयः, जन्यत्वस्य च बोद्धव्यपदघटकबुधधात्वर्थे बोधे स्वरूपसम्बन्धेनान्वयः, बोधस्य च निरूपितत्वसम्बन्धेन तव्य-प्रत्ययार्थविषयतायामन्वयः, तस्याश्च स्वरूपसम्बन्धेनार्थेऽन्वयः। एवञ्च "इदमभिन्नशब्दनिरूपितजन्यतावद्बोधनिरूपितविषयतावानर्थः" इदम्-पदजन्यो यो बोधः, तस्य विषयोऽर्थः इति सरलार्थः इत्यर्थविशेष्यिका; 'इदं पदमिममर्थं बोधयतु' अत्रेदमर्थस्याभेदेनार्थेऽन्वयः, अर्थस्य च विषयत्वरूपामर्थे वृत्तित्वसम्बन्धेनान्वयः, विषयत्वस्य च निरूपकत्व-सम्बन्धेन बुधधात्वर्थे बोधेऽन्वयः । बोधस्य च निरूपितत्वसंबन्धेन जनकत्वरूप आख्यातार्थेऽन्वयः, जनकत्वस्य च स्वरूपसम्बन्धेन पदेऽन्वयः तिङन्तस्थले प्रथमान्तार्थविशेष्यकबोधस्यैव नैयायिकैः स्वीकृत-त्वात्। एवञ्च 'इदमर्थनिष्ठविषयतानिरूपकबोधनिष्ठजन्यतानिरूपित-जनकतावत्पदम्' इति पदविशेष्यिका वेच्छा संकेतरूपा वृत्तिः।

तत्र आधुनिकसंकेतः—परिभाषा, तया चार्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसंकेतितनदीवृद्धयादिपदम् । ईश्वरसंकेतः—शक्तिः, तया चार्थबोधकं पदं वाचकं यथा गोत्वादिविशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादिर्वाच्यः, स एव मुख्यार्थ इत्युच्यते । इति गदाधरभट्टाचार्यः । जगदीशतर्कालङ्कारस्तु—उभयावृत्तिधर्मविशिष्टसंकेतवती संज्ञा-पारिभाषिकी । यथाऽऽकाशडित्थादि । अत्र शब्दवति आकाशे व्यक्तौ नित्यसंकेतवती आकाशेति संज्ञा । दारुमयहस्तिव्यक्तौ आधुनिकसंकेतवती डित्थेति संज्ञा । आकाशडित्थादिसंज्ञा हि द्वितयावृत्तिधर्मेणैव शब्देन दारुमयहस्तिवृत्तितद्व्यक्तित्वेन रूपेण शब्दाश्रयं दारुमयहस्तिवृत्तितद्व्यक्तित्वाश्रयं प्रतिपादयति । घटत्वादिजातेरनेकवृत्तित्वात् घटत्वादिजात्याश्रयः घटपदं न परिभाषिकम् । आकाशादिपदस्य शब्दाश्रयत्वविरहिते केवले गगनादौ संकेतकल्पने तु पटादीनामपि पारिभाषिकत्वं स्यात् ! तत्रापि पटत्वविरहिते केवले पटे संकेतस्य कल्पयितुं शक्यत्वात् । एवञ्चातिव्याप्तिः पादलेष्ठुका स्यात् । यदि पटे संकेतितमपि 'पटपदं न पटत्वजातिविशिष्टशक्तिमत्' इत्यादिनिश्चयानन्तरं पटादिपदशक्तिग्रहात् पटपदात् पटत्वजातिविशिष्टस्य पटस्याननुभवादवश्यं पटादिपदशक्तिः किञ्चिद्धर्मविशिष्टार्थनिरूपिता न तु केवलव्यक्तिनिरूपिता, अन्यथा 'तद्धर्मप्रकारकतद्धर्मिविशेष्यकनिश्चये सति तद्धर्माभावप्रकारकतद्धर्मिविशेष्यकनिश्चयो न भवतीति सिद्धान्तात् 'पटपदं न पटत्वजातिविशिष्टशक्तिमत्' इत्याकारकनिश्चयानन्तरं पटादिपदशक्तिग्रहात् पटपदात् पटत्वजातिविशिष्टस्य पटस्यानुभवो न स्यात् । तव मते शक्तौ पटत्वस्य प्रकारतयाऽनिवेशात्, प्रतिबन्ध्यप्रतिबन्धकयोः समानाकारकत्वाभावात्," इत्यवश्यं पटत्वावच्छिन्ने शक्तिरभ्युपगन्तव्येतीदमुच्यते, तर्हि तुल्ययुक्त्याऽऽकाशादिपदेऽपि कथं गजनिमीलिकाऽऽद्रियते ! तत्रापि शब्दवति शक्तमप्याकाशपदं 'न शब्दाश्रयशक्तिमत्' इति बाधनिश्चयदशायामाकाशादिपदान्न शब्दाश्रयत्वेन गगनस्य प्रतीतिरिति शब्दाश्रय एवाकाशस्य शक्तिरिति विभाव्यताम् ! एवञ्च "घटत्वाद्युप-

लक्षिते धर्मिण्येव ( न तु पटत्वादिजातिविशिष्टे ) शक्तिग्रहस्य ताद्रूप्येण ( पटत्वादिना ) पदविषयकानुभवं प्रति हेतुत्वान् मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः। परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेव" इति वदतो दीधितिकारस्यापि गेहे रजनीत्यहो विधेर्विधानवैचित्र्यम्! एकसम्बन्धेनानेकेषु वर्तमाना ये उपाधयो धर्मास्तद्विशिष्टे संकेतवती संज्ञा त्वौपाधिकी। यथा भूतद्रुतादिः। सा हि सचेतनावृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव शक्तो भवति। शब्दादिकन्तु सखण्डत्वेनोपाधिरपि नानुगतो द्वितयावृत्तित्वादतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः। नन्वेवं घटपदस्यापि नैमित्तिकत्वं न स्यात् प्रत्युत घटत्वजातेरवयवसंयोगविशेषवृत्तितयौपाधिकत्वं स्यादिति चेत्! इष्टापत्तिः। यदि च स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन वैजात्यवत्त्वेन शक्तं घटपदं' तदा नैमित्तिकमेवेति न व्यवहारविरोधः इत्याह। इति नैयायिकमतेन वृत्तिविचारः॥

*भर्तृहरिपादास्तु—*

यस्मिन्नर्थे यन्नामाधुनिकसंकेतवत्तदेव तत्र पारिभाषिकम्। एवञ्च यादृशानुपूर्वीयादृशार्थविशेष्यककिञ्चिज्जन्यबोधविषयत्वप्रकारकानित्य-संकेतविषयताविशेषावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थे पारिभाषिकत्वमिति पर्यवसितम्। यथा पित्रादिभिः पुत्रादौ संकेतितं चैत्रादि, यथा वा शास्त्रकृद्भिः सिद्धयभवादौ संकेतितं पक्षतादि। यस्मिन्नर्थे जात्यवच्छिन्नशक्तिमन्नाम नैमित्तिकम्। एवञ्च यादृशानुपूर्वी यादृशार्थविशेष्यकजात्यवच्छिन्नस्वशक्तिनिरूपकतावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थनैमित्तिकत्वं पर्यवसितम्। यथा गवि गोनाम, गवये गवयादिनाम। यत्रार्थे यदुपाध्यवच्छिन्नशक्तिमन्नाम्, तदौपाधिकम्। तथा च यादृशानुपूर्वी तादृशार्थविशेष्यकसखण्डधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदिका तादृशानुपूर्वीमत्त्वं तादृशार्थौपाधिकत्वं फलितम्। यथाऽऽकाशपश्वादि। ननु आधुनिकसंकेतस्यापि शक्तिमत्त्वात् पारिभाषिकचैत्रादि-

शब्दानां नैमित्तिकत्वापत्तिः, नदीवृद्ध्यादिशब्दानाञ्चौपाधिकत्वापत्तिः। इष्टापत्तौ च तेन रूपेण विभागासम्भवः, मिथो विरुद्धधर्मस्यैव विभाजकतावच्छेदकत्वादिति चेन्न, नित्यस्यैव संकेतस्य शक्तित्वेनाधुनिकस्य संकेतस्य शक्तित्वाभावात्। तथाऽऽह—

आजानिकश्चाधुनिकः संकेतो द्विविधो मतः।
नित्य आजानिकस्तत्र, या शक्तिरित्यभिधीयते॥
कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृतः॥ इति।

तत्र-तयोर्मध्ये, नित्यः संकेतः—आजानिकः—नास्ति जनिरुत्पत्तिर्यस्यासौ अजनिः, अजनिरेवाजानिकः स्वार्थे इकणिति आजानिकशब्दो यौगिकः। अन्ये तु आजानिकः कालत्वव्यापक इत्यर्थः। तथा चाजानिकः शब्दः पारिभाषिक इत्याहुः।

तन्न—यौगिकसम्भवे पारिभाषिककल्पनाया अन्याय्यत्वात्। न च प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगिरूपस्य नित्यत्वस्य योगालभ्यत्वेन तद्बोधने तस्य कथं यौगिकत्वमिति वाच्यं, प्रागभावातिरिक्तस्यानुत्पन्नवस्तुनो ध्वंसाप्रतियोगित्वनियमात्। नित्यपदस्यैवानुत्पन्नपरत्वाद्वा। न च तयोरेकार्थत्वेन पौनरुक्त्यम्, आजानिक इत्यस्याजानिकशब्दप्रतिपाद्यपरत्वात्। अत एव या शक्तिरित्यत्र यत्पदस्य नित्यसंकेतपरत्वेऽपि 'शक्तिरित्यभिधीयते' इत्यनेन शक्तिपदप्रतिपाद्यत्वकथनात् न पौनरुक्त्यम् अत एव च "प्रजावती भ्रातृजाया" "श्यालाः स्युर्भ्रातरः पत्न्याः" "सत्कृत्यालङ्कृतां कन्यां यो ददाति स कूकुदः" इत्यादावपि न पौनरुक्त्यम्। कादाचित्कत्वं—ध्वंसप्रतियोगित्वम्। आधुनिकः—आधुनिकशब्दप्रतिपाद्यः। स च कः! इत्याकाङ्क्षायामाह—शास्त्रकारादिभिरिति।

आदिना म्लेच्छादिपरिग्रहः। यथा स्त्रीकृतेकारे नदीपदस्य, आरादिषु वृद्ध्यादिपदस्य संकेतः, कङ्गौ यवपदस्य संकेतः। न च पित्रादिसंकेतिते चैत्रादिपदे नित्यसंकेतवत्त्वे मानमस्ति, "द्वादशेऽहनि पूर्वपूर्वप्रयुक्तत्वापाताच्च, तस्य तन्नियतत्वादित्युक्तत्वात्। चैत्रादिपदानामिव

पारसीकादिशब्दानां संकेतवत्त्वाविशेषेऽपि न तेषां धर्मकर्मण्युपयोगः "साधुभिर्भाषितव्यं नापभ्रंशितवै न म्लेच्छितवै" इति श्रुत्या तत्र तन्निषेधात्। म्लेच्छितवै—म्लेच्छमात्रसंकेतितैः, खरादिशब्दास्तु रासभादौ म्लेच्छैरिवार्य्यैरपि संकेतिताः इत्याहुः।

## शाब्दिकमतेन शक्तिस्वरूपविचारः

शब्दस्य प्रमाजनकत्वे सर्वैः शब्दैः सर्वेषां श्रोतॄणां बोधः स्यादिति शाब्दबोधं प्रति वृत्तिप्रयोज्योपस्थितेरन्वयव्यतिरेकाभ्यां कारणत्वमवगम्यते। सा च वृत्तिः दाहं प्रति वह्नयादिवन्न स्वरूपेण हेतुः सर्वेषां बोधापत्तेरितिज्ञानविषयीभूताया एव तस्याः कारणत्वमङ्गीक्रियते। वृत्तेर्लक्षणन्तु-वृत्तिपदव्यवहार्यत्वम्, अर्थपदोभयनिरूपितसम्बन्धत्वं वा। सा च वृत्तिस्त्रिधा, शक्तिर्लक्षणा व्यञ्जना च। यद्यपि लक्षणाव्यञ्जने वैयाकरणैर्न स्वीक्रियेते। एतत्तत्त्वं च मयाऽऽमुख एवावेदितं तथापि लक्षणाव्यञ्जनाविषयको व्यवहारस्तेषामप्रसिद्धशक्तिपदपर्यायभ्रान्त्या तत्र तत्र भवतीति तदनुसृत्य वृत्तिभेदत्वेनात्र लक्षणाव्यञ्जने उपात्ते। तयोस्तत्र तत्र निरूपणमपि मतान्तरपरत्वेनोन्नेयम्। तत्र शक्तिस्तावन्न ईश्वरेच्छारूपा, इच्छारूपा वा, व्यवहारात्तस्या ज्ञानस्यासंभवात्। तथाहि—वृत्तिज्ञानं व्यवहारात् जायते, यथा सर्गादौ प्रयोजकवृद्धेन 'घटमानय' इत्युक्ते घटमानयन्तं प्रयोज्यवृद्धं पश्यता बालेनानुमीयते 'अयं प्रयोजकवृद्धः 'घटानयनं मत्कार्यम्' इतिज्ञानवान्, घटानयनविषयकचेष्टावत्त्वात् ततः 'प्रयोज्यवृद्धज्ञानम् 'घटमानय' इति वाक्यजन्यं, तद्वाक्यश्रवणाव्यवहितोत्तरमेव तत्प्रवृत्तेः' इत्यनुमानेन ज्ञानजनकत्वं वाक्ये निश्चीयते। तत आवापोद्वापाभ्यामन्वयव्यतिरेकेण पदादिष्वपि पदार्थविषयकबोधकजकत्वं निर्धार्यते। तच्च पदे वाक्ये वा बोधजनकत्वं बोधकारणीभूतपदवाक्ययोरर्थेन सह सम्बन्धाभावे नोपपद्यते 'विषयेण सह सम्बद्धानामेव प्रमाणानां चक्षुरादीनां ज्ञानोत्पादकत्वदर्शनात्। नहि घटेन सह सम्बन्धं विनैव चक्षुरादि ज्ञानं जनयति। एवञ्च कारणत्वान्यथानुपपत्या कल्प्य-

मानः शक्तिरूपः कारणसम्बन्धो ज्ञानरूपकार्य्योत्पत्तेः प्रागेवापेक्ष्यते। तदानीञ्च नैयायिकाभिमतस्य 'ईश्वरेच्छारूपस्य इच्छारुपस्य वा सम्बन्ध-स्यासिद्धत्वेन ज्ञाताया एव शक्तेर्बोधकत्वेन शक्तिग्रहासम्भवः स्यात्। इदमत्राकूतम्—शाब्दबोधात् प्राक् तत्कारणीभूतं शक्तिज्ञानमपेक्षितम्। बोधजननात् प्राक् 'बोधजनकत्वाभाववदिदं पदम्' इति निश्चयसत्त्वेन 'तद्वत्ताज्ञानं प्रति तदभाववत्तानिश्चयस्य प्रतिबन्धकत्वेन 'इदं पदमेतदर्थविषयकबोधजनकतावत्' इत्यादि स्वरूपस्य ।बोधजनकत्व-घटितेच्छात्मकस्य शक्तिपदार्थस्य ज्ञानमसम्भाव्यमेवेति तत्त्वम्।

किञ्च ईश्वरेच्छाया ईश्वरज्ञानस्य वा शक्तित्वमित्यत्रैकतरपक्ष-पातियुक्तेरभावात् उभयस्वीकारे तार्किका गौरवपराहता भवेयुः। जानाति, इच्छति, ततो यतते, इति क्रमदर्शने तु प्रत्युत ज्ञानस्य शक्तित्वे प्राथम्यमेव विनिगमकम्।

अथ च 'दण्डात् घटो जायताम्' इत्यादीच्छाविषयत्वमेव दण्डादौ घटादिकारणत्वं स्यात्। तथा चेच्छातिरिक्तलोकप्रसिद्धस्य कारणत्वरूप-धर्मस्य विलयः स्यात्। यदि तु दण्डादौ स्वरूपसती शक्तिः कार्यो-त्पादिका, शब्दनिष्ठा तु ज्ञातैवेति वैलक्षण्यदर्शनात् तत्रातिरिक्तशक्ति-स्वीकारे न किञ्चिद् बाधकमित्युच्यते, तदा तु यथा प्रत्यक्षस्थले संयोग-समवायादिसन्निकर्षेण घटादिना सम्बद्धानामेव चक्षुरादीनां प्रत्यक्षप्रमा-जनकत्वं न तु जनकत्वघटितेच्छारूपसम्बन्धेन वा, तथा शब्दस्यापि प्रमाणत्वेन तदतिरिक्तसम्बन्धेनार्थेन सह सम्बद्धस्यैव शाब्दज्ञानजन-कत्वमुचितम्। अन्यथा 'पर्वतो वह्निमान् धूमात्' इत्याद्यनुमितिस्थलेऽपि हेतुसाध्ययोः 'धूमज्ञानजन्यज्ञानविषयो वह्निर्भवतु' इतीच्छाविषयत्वेन वह्निविषयकबोधजनकत्वरूपेण वा सम्बन्धेन निर्वाहे हेतुसाध्ययो-र्नैयायिकाभिमतव्याप्तिरूपसम्बन्धोच्छेदापत्तिः। तस्मात् पदपदार्थयो-र्बोधजनकत्वं तद्घटितेच्छादिरूपश्च सम्बन्धो नोचितः। किन्तु वाच्य-वाचकपदव्यवहार्यं निरुक्तेच्छादिभिन्नं पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः। तत्र वाचकत्वं वाच्यत्वञ्च न क्रमेण बोधजनकत्वरूपं बोध-

विषयत्वरूपञ्च किन्त्वखण्डोपाधिरूपं पदार्थान्तरम्। अन्यथा पूर्वोक्त-दोषापत्तिः वज्रलेपायेत। स च वाच्यवाचकभावः शब्दार्थोभयनिष्ठ एव तथाविधशक्तिज्ञापकं 'योऽयं शब्दः सोऽर्थो, योऽर्थः स शब्दः' इत्याकारकमितरेतराध्यासमूलं तादात्म्यम्। तदेव संकेतः। तस्यापि पदवृत्तिशक्तिज्ञापकत्वाच्छक्तिरितिव्यवहारः। पाणिन्यादिस्मार्त्त-संकेतस्यैव वाचकतानियामकत्वं नत्वाधुनिकस्य। एवञ्चाधुनिकसंकेत-स्थले द्वादशेह्नि क्रियमाणनामस्थले च लक्षणेति मञ्जूषाकाराः।

प्राचीनवैयाकरणास्तु—बोधजनकतां शक्तिमाहुः। तथा चोक्तं भूषणे—

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।

( शक्ति निर्णयः, ३७ कारि० )

इन्द्रियाणां चक्षुरादीनां, स्वविषयेषु—चाक्षुषेषु घटादिषु, यथाऽना-दिर्योग्यता—तदीयचाक्षुषादिकारणता, तथा शब्दानामपि अर्थैः सह तद्‌बोधकारणतैव योग्यता, सैव शक्तिरित्यर्थ" इति। इयञ्च योग्यतारूपा शक्तिः पदार्थान्तरम् इति।

मीमांसकाः शक्तिं—पदार्थान्तरमाहुः।

आलङ्कारिकास्तु—संकेतसहकारिणी शक्तिः। संकेतस्तु शब्दार्थयोः प्रति-पाद्यप्रतिपादकलक्षणः सम्बन्धः, "अस्माच्छब्दादयमर्थो बोद्धव्यः" इति प्रवर्तकोपदेशो वा। स च शब्दे स्थितो ज्ञातः सन् अर्थं विषयीकरोति। अयं संकेतोऽर्थस्थितं पुरुषाज्ञानमुत्सार्य ज्ञातृत्वं जनयति। तत्र शब्दवत्तत्र गता क्रियापि करणं, प्रदीपस्य करणत्वे सति तत्प्रभावत्। सैव शक्तिरित्याचक्षते।

रसगङ्गाधरकारस्तु—'शक्त्याख्योऽर्थस्य शब्दगतः, शब्दस्यार्थगतो वा सम्बन्धविशेषोऽभिधा' इत्याह।

## वैयाकरणमतेन लक्षणाविचारः

शाब्दिका लक्षणां लक्षणाशब्देन न मन्यन्ते, वृत्तिद्वयावच्छेदकद्वय-कल्पने गौरवात्। अत एवेयं जघन्या वृत्तिः। 'गङ्गायां घोषः' इत्यत्र

गङ्गादिपदे शक्तिद्वयम् । भगीरथखातावच्छिन्नार्थनिरूपिता प्रथमा शक्तिः । सामीप्यसम्बन्धावच्छिन्नतटत्वावच्छिन्नविषयकत्वावच्छिन्नार्थनिरूपिता शक्तिर्द्वितीया। एवञ्च लक्षणया प्रतिपिपादयिषितस्यार्थस्याप्रसिद्धशक्त्यैव बोधनिर्वाहे कोऽभिनिवेशो लक्षणायां प्रेक्षावताम्। आलङ्कारिकेष्वपि केचन लक्षणाया अन्यत्रान्तर्भावं विदधति। तथा हि वामनः-अलङ्कारे "सादृश्याल्लक्षणा वक्रोक्तिः" (४।३।८)। रत्नाकरस्तु रूपकेऽन्तर्भावयति—"सादृश्यप्रयुक्तः सम्बन्धान्तरप्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्यनिर्देशः स सर्वोऽपि रूपकम्" रसगङ्गाधरतः संगृहीतोऽयमंशः। ( २२५ पृ० निर्णय सागर प्रे० )

## आलङ्कारिकमतेन लक्षणाविचारः

शक्यसम्बन्धसहकारिणी वृत्तिर्लक्षणा। सा च शब्दव्यापारत्वाच्छब्दनिष्ठा मुख्यार्थबाधे सति तत्सम्बन्धिनमर्थं विषयीकरोति। सम्बन्धश्च मुख्यार्थे प्राधान्येन वर्तमानोऽपि लक्ष्यार्थमाश्रयति। शक्यसम्बन्धो यद्यपि शब्देऽपि वर्तते तथापि लक्षणायामप्रयोजकः । यद्यपि 'काकेभ्यो दधि रक्ष्यताम्' 'छत्रिणो यान्ति' इत्यादौ न मुख्यार्थस्य बाधः, तथापि वक्तृतात्पर्यविषयवाक्यार्थबोधाभावोऽभिप्रेतः । आद्ये उपघातकत्वेनैव मुख्यार्थस्यान्वयो न तु काकत्वेन। अन्त्ये चैकसार्थप्रवृत्तत्वेनैव मुख्यार्थस्यान्वयो न तु छत्रित्वेनेति नाव्याप्तिः। यत्र तु काकमात्रे तात्पर्यं तत्र नैव लक्षणा। एतेन तात्पर्यानुपपत्तिरेव लक्षणाबीजम्, नत्वन्वयानुपपत्तिरिति सूचितम्। यद्यपि 'यष्टीः प्रवेशय, 'गङ्गायां घोषः' इत्यादावुभयापेक्षादर्शनात् विनिगमनाविरहः, तथापि 'गङ्गायां घोषः' इत्यत्र वक्तृतात्पर्याभावे घोषपदे एव मीने लक्षणा किन्न स्यात् ? कुतश्च गङ्गापदेऽपि स्वार्थसम्बन्धिनौकादौ न लक्षणा । तावताप्यन्वयानुपपत्तिशान्तेः । अतस्तात्पर्यानुपपत्तिरेव लक्षणाबीजमित्याहुरालङ्कारिकाः । यद्यप्यलङ्कारग्रन्थेषु मूले लक्षणाया बीजत्वेन तात्पर्यानुपपत्त्यादेः प्रायेणोल्लेखो नास्ति तथापि प्रदीपादिटीकापर्यालोचनेन तात्पर्यानुपपत्तेरेव बीजत्वस्यालङ्कारशास्त्राभिप्रेतत्वात् ।

साक्षात्सम्बन्धे सत्येव लक्षणेति न नियमः। प्रत्यक्षे संयुक्तसमवायादिव परम्परासम्बन्धस्यापि लक्षितलक्षणादावुपयोगदर्शनात्। तथा च लक्षितेन-लक्षणया गृहीतेन भ्रमरादिशब्देन द्विरेफादेः षट्पदपिण्डादौ लक्षणा लक्षितलक्षणेत्युच्यते। तत्र द्विरेफशब्दो द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या यौगिको न तु योगरूढो भ्रमरशब्दपरतया प्रयोगादर्शनात्। तेन 'निर्झर गुर्जर निर्जरादिसकलरेफद्वयान्वितशब्दसाधारणवाची न तु केवलभ्रमरपरः। तत्र सामान्यविशेषभावसम्बन्धेन भ्रमरशब्दो लाक्षणिकः। यथा—'मुनिमभिमुखतां निनीषवो याः' इत्यत्र मुनिशब्दो नृपतिमुनौ लाक्षणिकः। 'नृपतिमुनिपरिग्रहेण सा भूः' इति प्रयोगदर्शनात्। अथ वाच्यवाचकभावेन लक्षणयाऽभेदारोपात् भ्रमरशब्दलक्षितषट्पदे द्विरेफशब्दस्योक्तरीत्या लक्षितलक्षणा। तत्र सम्बन्धद्वयसम्भवात् स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरूपः परम्परासम्बन्धः।

## नैयायिकमतेन लक्षणाविचारः

शक्यसम्बन्धो लक्षणा। तत्र तात्पर्यानुपपत्तिरेव बीजम्। वाक्ये तु शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणापि नास्ति। यत्र गभीरायां नद्यां घोष इत्युक्तं, तत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या सहाभेदेनान्वयः, क्वचिदेकदेशान्वयस्यापि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं तात्पर्यग्राहकम्।

## मीमांसकमतेन लक्षणाविचारः

स्वबोध्यसम्बन्धो लक्षणा। 'गङ्गायां घोषः' इत्यादौ गङ्गापदबोध्यस्य प्रवाहस्य सम्बन्धस्तीरे इति तत्र लक्षणा। गम्भीरायां नद्यामिति वाक्यस्य बोध्या गम्भीराभिन्ना नदी, तत्सम्बन्धस्तीरे इति वाक्येऽपि लक्षणा। एवं समासात्मके चित्रगुरिति वाक्येऽपि चित्रगुपदस्यावयवशक्त्या चित्राभिन्ना गौः स्वबोध्या स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात् तत्सम्बन्धस्य स्वामिनि सत्त्वादित्याहुः।

## आलङ्कारिकमतेन व्यञ्जनाविचारः

मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारण-प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कार-विशेषो व्यञ्जना। मुख्यार्थस्य—शक्यार्थस्य, बाधः—परस्परसम्बन्ध-निरूपकाणां पदार्थानां तात्पर्यविषयीभूतसम्बन्धेनैकपदार्थेऽपरपदार्था-भावः, तन्निरपेक्षो यो बोधस्तज्जनकः। अस्य 'संस्कारविशेष' इत्यत्रा-न्वयः। मुख्यार्थेन सम्बद्धासम्बद्धौ यौ अर्थौ तदुभयसाधारणौ यौ प्रसिद्धा-प्रसिद्धार्थौ तौ विषयौ यस्य सः। वक्त्रादिवैशिष्ट्यम्—वैलक्षण्यम्, अन्य-व्यावृत्तो धर्म इत्यर्थः। तस्य यज्ज्ञानं, तच्च प्रतिभा च ते आदिनी यस्य निपुणताघटितसमूहस्य, तेनोद्बुद्धो यः संस्कारविशेषः स व्यञ्जना। एवञ्च वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतु-व्यापारत्वं व्यञ्जनात्वं फलितम्। प्रतिभा च वक्त्रादिवैशिष्ट्यसहकारेण जन्मान्तरीयतद्बीजनकत्वप्रकारकज्ञानजन्यसंस्कारोद्बोधजबुद्धिरूपा, वासनाविशेषरूपेति यावत्। सैव 'नवनवोन्मेषशालिनी' इत्युच्यते। एवञ्च शक्तिरेतज्जन्मानुभूतैव बोधजनिका व्यञ्जना तु जन्मान्तर-गृहीतापीति निष्कर्षः।

## वैयाकरणमतेन व्यञ्जनाविचारः

यद्यपि भाष्यादिप्राचीनतमेष्वाकरग्रन्थेषु क्वचिदपि व्यञ्जनाया विषये काचनापि विवेचना नोपलभ्यते। टीकादिग्रन्थेषु च 'वृत्तिश्च शक्ति-लक्षणाऽन्यतररूपा' इत्येव तत्र तत्र लिखितमस्ति, न तु व्यञ्जनाभि-प्रायेण 'अन्यतमरूपा' इति। अतो वैयाकरणाः व्यञ्जनां स्वीकुर्वन्ति न वेति संशीतिः सुतरां जागर्तितरां विदुषामपि। अत एव प्रकृतग्रन्थकृतो-क्तम्—'अत्र वैयाकरणाः-शक्तिरेव शब्दवृत्तिः, तस्याश्च प्रसिद्ध्यप्रसिद्धि-भ्यां शक्तिलक्षणाव्यपदेशः। व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारा-दिति'। तथापि स्फोटवादे ये श्रद्दधते तैरवश्यं व्यञ्जनाऽङ्गी-कर्त्तव्या। अन्यथा सकलशाब्दिकाभिमता तस्य व्यङ्ग्यता नैव सिद्धा

भवेत्। अत एव नागेशभट्टेन लघुमञ्जूषायां व्यञ्जनास्वरूपं प्रदर्श्योक्तम्—"अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्यादिभिरुक्ता। वैयाकरणानामप्येतत्स्वीकार आवश्यकः" इति। मन्ये श्रीमदाशाधरो नागेशात् प्रागवर्ती लघुमञ्जूषातोऽपरिचितः सन् तथोक्तवानिति ग्रन्थकर्तृजन्मकालपरिचयावसरे स्फुटीभविष्यति। व्यञ्जनास्वरूपं त्वत्रमते आलङ्कारिकवद् बोध्यम्।

इदमत्ररहस्यम्—तार्किकेषु शाश्वतिकविरोधानां शाब्दिकानां तार्किकमतप्रत्याख्यानमात्रफलो व्यञ्जनासमर्थनप्रयासो भवेत्? अन्यथा लक्षणाया प्रत्याख्याने यावान् हेतुः "जघन्यवृत्तिकल्पनाया अन्याय्यत्वम्" "वृत्तिद्वयावच्छेदकद्वयकल्पने गौरवम्" शाब्दिकैरुपात्तः तावान् सर्वोऽपि व्यञ्जनाविरोधाय नितरां जागर्ति। व्यञ्जनया यावानर्थः प्रतिपादयितुं शक्यते तावन्तं सर्वमपि प्रतिपादयितुमप्रसिद्धा शक्तिः सन्नह्यति। आलङ्कारिकाणां नये सहृदयैरेव व्यङ्ग्योऽर्थोऽवगम्यते, तादृश एवार्थोऽप्रसिद्धशक्त्या निरुच्यते 'सहृदयहृदयमात्रवेद्यात्वमप्रसिद्धात्वम्' इति शाब्दिकोक्तलक्षणात्। सति तात्पर्ये 'सर्वे सर्वार्थवाचकाः' इति भाष्यात् शाब्दिकानां व्यञ्जनायामनास्थाप्रत्ययात्।

नैयायिकास्तु—व्यञ्जनां नैव मन्यन्ते। व्यङ्ग्यार्थो हि ज्ञापनेन हेतुनाऽनुमीयते। तथा चोद्धृतं काव्यप्रकाशे—"ननु वाच्यादसम्बद्धं तावन्न प्रतीयते यतः कुतश्चित् यस्य कस्यचिदर्थस्य प्रतीतेः प्रसङ्गात्। एवं च सम्बन्धात् व्यङ्ग्यव्यञ्जकभावोऽप्रतिबन्धेऽवश्यं न भवतीति व्याप्तत्वेन नियतधर्मनिष्ठत्वेन च त्रिरूपात् ( सपक्षसत्त्वविपक्षासत्त्वपक्षसत्त्वस्वरूपत्रयवत इत्यर्थः ) लिङ्गाल्लिङ्गिज्ञानमनुमानं यत् तद्रूपः पर्यवस्यति। तथाहि—

भम धम्मिअ वीसद्धो सो सुणओ अज्ज मारिओ तेण।
गोलाणई कच्छ कुडङ्गवासिणा दरिअ सीहेण॥

गाथासप्तशती, द्वि० शतक ७५ पद्यम्।

भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन॥

अत्र गृहे श्वनिवृत्त्या भ्रमणं विहितं गोदावरीतीरे सिंहोपलब्धेर-भ्रमणमनुमापयति—'यत् यत् भीरुभ्रमणं तत्तद्भयकारणनिवृत्त्युप-लब्धिपूर्वकम्, गोदावरीतीरे च सिंहोपलब्धिरिति व्यापकविरुद्धोप-लब्धिः'' । तथा चाह व्यक्तिविवेककारो महिमभट्टः—

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।
व्यक्तिविवेकं कुरुते प्रणम्य महिमा परां वाचम् ॥

इति सरस्वतीतीर्थकृतटीकायां स्पष्टम् ।

## सन्दर्भस्यास्य वैशिष्ट्यम्

सन्दर्भेऽस्मिन् विविच्यमानो वृत्त्याख्यो विषयो यद्यपि *काव्य-प्रकाश-रसगङ्गाधर-साहित्यदर्पणाद्यलङ्काराकरग्रन्थेषु शब्दशक्तिप्रकाशिका-शक्तिवाद-न्यायसिद्धान्तमुक्तावल्यादिन्यायप्रौढग्रन्थेषु मञ्जूषादिव्याकरणविशिष्टग्रन्थेषु* च महताऽऽडम्बरेण प्रतिपादितो भूरि भूरि दृश्यते, तथापि प्रसङ्गोपात्त-त्वादस्य गौणत्वात् अलङ्कारादेश्च प्रधानत्वात् न तावान् समीक्षितोऽयं विषयो यावान् समीक्षितुमपेक्ष्यमाण आसीत् । वृत्तेः स्वरूपविषये लक्षणविषये चापाततो विचारसन्तोषभाजः 'सुपूरो मूषकाञ्जलिः' इति न्यायात् संपादयन्तु मनाक् सन्तोषमुपरितनेभ्य आकर-ग्रन्थेभ्यः, परं तत्त्वतलावगाहनपराणां जिज्ञासूनां तु नैवाकाङ्क्षा शान्ति-मेति टीकाप्रटीकाविलोकनेनापि । प्राधान्येन वृत्तिविवेचनाय मुकुल-भट्टेन *अभिधावृत्तिमातृका* ग्रथिता । परन्तु विचारस्यातीवसंकीर्णत्वात्, वैज्ञानिकदृष्टेः शून्यत्वात्, एकदेशित्वाच्च न प्रमोदं प्राप्नुवन्ति पण्डिता-स्तत्र । श्रीमदप्पयदीक्षितविहित*वृत्तिवार्तिकं* तु सम्पूर्णं लब्धुं नाद्यापि संस्कृतसाहित्यं सौभाग्यशालि समजनीति कस्य मेधाविनस्तिरोहित-मस्ति । यद्युपालप्स्यत तत्तदाऽवश्यं संस्कृतसाहित्यमत्रविषये उपाकरि-ष्यतेत्यलमलब्धस्य लाभचिन्तया । वाग्देवतावतारस्य मम्मटस्य शब्द-व्यापारविचारस्तु,यः किल मोहमयीस्थे निर्णयसागरमुद्रणालये प्रकाश्यतां नीतः, काव्यप्रकाशवर्णितवृत्तेः संक्षिप्तोंऽशो नितरामपर्याप्तो वृत्तिज्ञानाय सुधियामपि ।

मौनिश्रीकृष्णभट्टविरचिता वृत्तिदीपिका, या हस्तलिखिता वाराणसेय-राजकीय संस्कृतमहाविद्यालय-सरस्वतीभवनपुस्तकालये सुरक्षिता वर्तते, मया सम्यक् परीक्षिता चेतसश्चमत्कृतिं जनयति। तत्र शास्त्रीयपद्धत्या विचारिता वृत्तिः सुमनसां मनांस्यावर्जयति। त्रिवेणिकायां च प्रथमं वृत्तिसामान्यं निरूपितम्। तदनु शक्तेः, लक्षणायाः, व्यञ्जनायाश्च क्रमेण प्रकरणत्रये निरूपणं वर्तते। कामं गभीरस्याप्यस्य वृत्त्याख्य-शास्त्रीयविषयस्य तथा सरलसरलया मर्मस्पर्शिन्या भारत्या प्ररूपणं दृश्यते यदर्थं तार्किका दुर्भेद्यान् भाषाप्राकारान् निर्माय विषयतोऽपि भाषां गहनीचक्रुः, येन विद्यार्थिनो भाषापङ्के एव निमग्ना गाव इवावसीदन्तः प्रतिपाद्यं विषयं यथायथं समवगन्तुं न पारयन्ति। त्रिवेणिकायां चास्यां निर्मलाम्भसि प्रकीर्णानि मुक्ताफलानीव विषयाः झटिति दृग्गोचरीभवन्ति। अत्र ग्रन्थे प्रसङ्गतो नैयायिकादीनां मतानि सम्यक् समालोचितानि सन्ति। ग्रन्थपर्यालोचनेनालङ्कारिकसिद्धान्ते प्रबन्ध-कर्त्तुः पक्षपातः प्रतीयते। वार्तिकभाष्यकाव्यप्रकाशादीनामाकरग्रन्थानां भूयांसि प्रमाणानि संकलितानि सन्ति। महाभारतभागवतसदृशप्राचीन-तमानां नैषधकिरातकुमारसम्भवसदृशाधुनिकानां ग्रन्थानां प्रचुराण्युदा-हरणानि समुद्धृत्य विषयोऽतीव विशदीकृतोऽस्ति। संग्रहोऽप्ययं ग्रन्थो लक्षणाप्रयोजकसम्बन्धादिनिरूपणेन वैशिष्ट्येन तत्तद्ग्रन्था-पेक्षया किमपि स्वीयं महत्त्वमुपादेयत्वञ्च पृथक् व्यवस्थापयतीति निर्विवादम्। अत्राङ्कितानि स्पष्टं वस्तुतत्त्वं समानीतानि तत्तच्छास्त्रविषय-काण्युदाहरणानि श्रीमदाशाधरभट्टस्य सर्वतन्त्रस्वतन्त्रत्वं साधयन्तीति निभालयन्तु समाहितात्मानः सुधियः। वृत्तिविषये यावद् यच्चापेक्षितं वस्तु भवेत् तत् सर्वं शास्त्रीयशैल्या सरलसुबोधरीत्या च वर्णितं केनापि गुणैकपक्षपातिना विदुषा विलोकयितुं पार्येत।

## आशाधरस्य कृतयः

अत्यन्तावार्चीनभारतीयसंस्कृतसाहित्यलेखकेषु यत् स्थानं नागेश-भट्टस्य तदेव स्थानं प्रकृतग्रन्थकर्त्तुरपि विद्यत इति नास्ति मतद्वयस्या-

वकाशः। यथा *नागेशभट्टेन* विविधविषयानधिकृत्य भूयांसो निबन्धा निबद्धाः, तथा आशाधरेणापि। मन्ये, परस्परजिगीषया भट्टद्वयीयमहमहमिकया तान् तान् ग्रन्थान् व्यरीरचत्, स्वजनिमवनीं च यशो मालिकाभिः पर्यभूषयत्। बाढं, नागेशस्य विशिष्टाः सर्वे सन्दर्भाः प्रकाश्यतां नीताः सम्प्रति पठनपाठन उपयुज्यन्त इति विपुला विख्यातिर्विद्यते निखिलेष्वपि प्रदेशेषु। संस्कृतसाहित्यस्य दौर्भाग्यात् आशाधरस्य तु विशिष्टा ग्रन्थाः, प्रकाशनस्य वार्ता कोणे तिष्ठतु, नाम्नाप्यपरिचिताः सन्ति अनुसन्धानकर्मरतानामपि धीधनानामिति श्रुत्वा केषां सहृदयानां मनांसि न दूयेरन्। प्रकाशनाभावादेव गुर्जर-सौराष्ट्र-खानदेश-कच्छ-सिन्ध-प्रदेशेष्वेव आशाधरस्य कृतयो विप्रवराणां कुटीरकोणान् स्वतन्त्र-पुस्तकालयांश्च भूषयन्तितमाम्।

मया पर्यवलोकितासु निखिलासु आधाधरस्य कृतिषु स्वोपज्ञकाद-म्बिनीटीकाकलितः *कोविदानन्दो* वस्तुतः कोविदानानन्दयेत्, तस्य कादम्बिनी टीका वस्तुतः मनीषिणां मानसमयूरान् नर्तयेत्। यस्योल्लेखः सविस्तरः प्रागेव मयाऽऽवेदितः। अपरा कृतिः *श्रीमदप्पयदीक्षितकृत-कुवलयानन्दस्य अलङ्कारदीपिका* टीका नितरां प्रसिद्धिं गतास्ति। टीकेयं सर्वावयवसम्पन्ना सरलसरलाऽपेक्षितापरित्यागानपेक्षितासंग्रहा शैल्या भृशं मल्लिनाथस्यानुकरोति। टीकां तां पर्यवेक्ष्य कोऽपि समीक्षा-सम्पन्नोऽपरं *मल्लिनाथ*मेव तं निश्चिनुयात्। अलङ्कारदीपिका साहित्या-द्यनेकशास्त्रमर्मज्ञेन *श्रीवामन* झलकीकर महाभागेनाप्युद्धृताऽस्ति "*कुवलयानन्दकारिकाव्याख्यायामाशाधरभट्टास्तु*" रूपवत्करोतीति रूपयतीति (वा) रूपको लक्षणाविशेषः, रूपयुक्तं करोतीत्यर्थः। सोऽस्मिन्नस्तीति रूपकमलङ्कारः" इत्याहुः" ( काव्य प्रकाश. उ० १०, टी०, पृ० ५८३ )। अनेकत्र मुद्रिताऽपि टीकेयं मोहमयीस्थनिर्णयसागरमुद्रणालयस्य प्रकाशनेन महतीं ख्यातिं नीता। *अलङ्कारदीपिका जर्मन*भाषयाऽनूद्य *बर्लिन*नगरे १९०७ इसवीये प्रकाशितेति हिन्दुविश्वविद्यालयस्य प्राध्यापक स्व० श्री *बटुकनाथ शर्मा* वदति "It has been translated into German by

R. Schmidt and published at Berlin in 1907" अग्रे तेनैव टीकितम्—"I have not been able to get this translation here and so. I regret 9 could not know what the learned translator has to say about Āsādhara and his works."

तत्त्वचिन्तामणि-दीधितेर्यथा *जागदीशी*, *माथुरी*, *गादाधरी* टीका वर्तते तथैव आशाधरस्य *आशाधरी*। विहितेऽपि बहुप्रयत्ने तां पर्यवेक्षितुं नाहमपारयमिति भृशं दोदूयते चेतः। गुर्जरप्रदेशे प्राप्तवंशपरम्परासंस्कृतपाण्डित्यानां गुर्जरगदाधराणां श्रीमतां बदरीनाथ शास्त्रिणां नैजे सरस्वतीसदने हस्तलिखिताऽद्यापि सुरक्षिता वर्तते। *अद्वैतविवेकस्य* त्रिवेणिकायां तत्कृतित्वेनोद्धरणं दृश्यते। यथा "मत्कृतेऽद्वैतविवेके च—

मृगाङ्कोऽपि न मृगी शशाङ्कत्वाच्छशीति तु।

चन्द्रमाः कथितस्तत्र रूढेरन्यन्न कारणम्॥" इति ( पृ० १६ ) अयं ग्रन्थः *वटपत्तनस्थ ( बड़ौदा ) विश्वविद्यालय-प्राच्यविद्यामन्दिरे* मया दृष्टः। परन्तु स ग्रन्थः केनचिदन्येन नाम्ना निर्दिष्टः। भूयो भूयोऽन्विष्टोऽपि तत्र नायं श्लोको दृष्टिगोचरीकृतः। त्रिवेणिकायामेकस्यां प्रतौ च 'मत्कृते' इति पाठोऽपि नास्ति। नाम्नाऽनुमातुं शक्यते यत् अद्वैतवेदान्तस्य ग्रन्थो भवेदिति। त्रिवेणिकाविषये तु भूमिकाप्रारम्भ एव कोविदानन्दपरिचयप्रदानावसरे मया विवरणं प्रस्तुतमस्तीति तत एवावसेयम्। यत्तु डॉ० दे तथा *श्रीकाणेमहाभागाः त्रिवेणिकाया* उल्लेखं स्वस्वग्रन्थे ( Hindu Poetics ) न कृतवन्तः। श्रीकाणेमहोदयैः कोविदानन्दे गृहीतेऽपि त्रिवेणिका नैव स्पृष्टा। तत्तु ग्रन्थसूच्यां व्याकरणविभागे त्रिवेणिकादर्शनजन्यभ्रान्तिमूलकमेव। यदि ते स्वयं हस्तलिखितां त्रिवेणिकामपठिष्यन् तदा नैवं कर्त्तुमपारयिष्यन्। व्याकरणस्यायं ग्रन्थो नास्तीति पूर्वमेव चर्चितमस्ति। ग्रन्थकर्त्तुरस्य *प्रभापटलं* नामापि काचन कृतिर्वर्तते। अन्यत्र कुत्रचिदस्योल्लेखाभावादपि *त्रिवेणिकाग्रन्थान्ते*, हरिणीछन्दसा निबद्धं श्लोकद्वयं तत उद्धृत्याङ्कितमित्यस्य स्वयं निर्देशेन तस्यास्तित्वे

शङ्कनं पाणितलेन पतङ्गपिधानमिव स्यात् ! पटलपदेन प्रतीयते यत् तन्त्रेऽस्यान्तर्भावः कर्त्तुं शक्येत। प्रयत्ने समाचरितेऽयं ग्रन्थोऽवश्यमुपलभ्येत। अद्यापि गुर्जरप्रान्तेऽनेके तान्त्रिकास्तत्संप्रदायाश्च जाग्रतितमाम्। अन्ततो यदि श्रीमदाशाधरस्य सर्वाः कृतयः प्रकाश्यतां नीयेरन् बर्हि संस्कृतसाहित्ये गुर्जरभुवः शिरः सर्वतः समुन्नतं भवेदित्यत्र नास्ति मतद्वयस्यावकाशः।

## ग्रन्थकर्त्तुः परिचयः

त्रिवेणिकायाः कर्त्ता श्रीमदाशाधरभट्टो गुर्जरदेशस्य खम्भात (Cambay) समीपस्थपटपत्तनस्य (पेटलाद) सविधे 'वसो' इत्याख्यं नगरकल्पं स्वजनुषा पर्यभूषयदिति केचन वदन्ति। केचन तन्निकटस्थं 'पीज' नगरं केचन च पटपत्तनमेव ग्रन्थकर्त्तुः जन्मस्थानमवधारयन्ति। एतन्नगरत्रयमपि परस्परमतीव सान्निध्यमासादयत्तिष्ठति। अत्रैकमत्यं जिज्ञासमानेन मयाऽनेके विख्याताः कुलपरम्परासेवितसंस्कृतसाहित्या गौर्जरा विद्वांसः साक्षात् कृताः परन्तु यथा यथा ऐकमत्याय प्रयतितं तथा तथा वैमत्यमेव विलोक्यान्यतममेव ग्रामं भट्टमहोदयस्य जन्यवनीं निरचिनवम्। सम्प्रत्यपि श्री·आशाधरस्य विषयेऽनेका जनश्रुतयो गुर्जरभूवलयमण्डलपण्डितमण्डलीषु श्रूयन्ते। ग्रन्थकर्त्तुः प्राक् गुर्जरप्रान्ते सारस्वतव्याकरणमेव पठनपाठने उपयुज्यमानमासीत्। परन्तु भट्टारुणस्योदयादनन्तरं पाणिनीयव्याकरणभास्वतो भास्वरेण भासा समग्रोऽपि गुर्जरप्रान्तः समकालमेव व्यापि। ततः प्रभृति शब्दानुशासनस्यास्याविरतधारा भगीरथपथप्रवृत्तविबुधसरितेवाद्यापि पुनाति पुण्यतमां तां पृथुपुत्रीम्। उपलभ्यमानेषु प्रकृतग्रन्थकृतो ग्रन्थेषु कस्मिन्नपि ग्रामस्य संकेतो नास्ति तथापि लक्षणानिरूपणावसरे "गुर्जरनिर्जरजर्जरादि" ( ३० पृ० ) घटितगुर्जरपदेन देशस्तु स्पष्टतया सूचितः। तत्रत्याः किंवदन्त्योऽपि संवदन्त्यत्र।

अयं किल *आशाधरः* रामजीभट्टस्य सूनुः धरणीधरस्य शिष्यः कविश्चासीत् । यस्योल्लेखो मङ्गलाचरणावसरे 'अलङ्कारदीपिकायाम्' वर्तते—

शिवयोस्तनयं नत्वा गुरुं च धरणीधरम् ।
आशाधरेण कविना रामजीभट्टसूनुना ॥

अनेन त्रिवेणिकामङ्गलेन चास्य गाणपत्यत्वं विशेषतः प्रतीयते । अद्यापि गुर्जरप्रान्ते गणपत्युपासका भूयांस उपलभ्यन्ते । वैदुष्यविषये प्रकरणसमाप्तौ स्वयमेवात्मानं *पदवाक्यप्रमाणपारावारीण*त्वेन निर्दिशति । ग्रन्थाश्चास्य सत्यापयन्ति तत् । यत्तु "केचित् 'न्यायव्याकरणमीमांसाशास्त्राणि स्वपितुरधीतानि, अलङ्कारशास्त्रं गुरोर्धरणीधरात्' इत्याहुः" तत्तूत्प्रेक्षितमात्रम्, तादृशगवेषणायामन्तरङ्गबहिरङ्गप्रमाणाभावात् ।

## आशाधरद्वयी

संस्कृतसाहित्येतिहासस्य पत्राणां पर्यवलोकनेन आशाधरनामा पण्डितद्वयी दृष्टिपथमवतरति । ययोरेकं श्री*पिटर्सन*महोदयः ( Peterson ) अपरं बूलर महोदयश्च ( Buhler )निर्दिशति । ग्रन्थानां ग्रन्थकर्तॄणां सूच्यां तु द्वयोरभिन्नत्वं प्रदर्शितमस्ति । नामसादृश्येन स्वयं भ्रान्त आफ्रेट ( Aufrecht ) महोदयोऽनेकान् परप्रत्ययनेयबुद्धीन भारतीयान् विदुषोऽपि भ्रामितवान् । अपथे "पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" "स्वयं नष्टः परान् नाशयति" वस्तुतोऽत्र भ्रान्तेरवसर एव नास्ति । द्वयोरेकत्वस्य आभासोऽपि नास्ति । यतो हि अन्यतरेण स्वरचित*त्रिषष्ठिस्मृतिचन्द्रिकायाम्* १२९६ तम ईसवीयसंवत्सरो रचनाकालोऽङ्कितः । तस्यैकतमा कृतिः *रुद्रटस्य* काव्यालङ्कारस्य टीका । अयम*आशाधरः* 'व्याघ्रेरवाला'कुटुम्बे *सल्लक्षणस्य* पुत्र आसीत् । यत्स्वयमेवोल्लिखति । अयञ्च जैन आसीत् । अपरस्य च ब्राह्मणत्वं कोविदानन्दस्य, त्रिवेणिकाया अलङ्कारदीपिकायाश्च मङ्गला-

चरणेन प्रथितमेव। एकस्यां *त्रिवेणिका*हस्तलिखितप्रतौ "संवत् १८३० तमे कृतमिदमाशाधरभट्टेन पुस्तकम्" इति हस्तलिखितप्रतिलेखकेन समयः संकेतितः। एवञ्च कालकृतिजातिभेदाद् द्वयोरभिन्नत्वं ब्रह्मणापि साधयितुं न शक्यते।

## आशाधरस्य समयः

यद्यपि गुर्जरप्रदेशे प्रकृतग्रन्थकृतो विषयेऽनेका जनश्रुतयः श्रूयन्ते। सम्प्रत्यपि तद्वंशजाः सन्तीत्यपि श्रूयते। परन्तु निखिलमप्येतत् लेखकस्य जन्मकालं वस्तुतो निर्णेतुमनीशम्। स्वयमपि लेखकेन कुत्रचित् जन्मसमयो ग्रन्थलेखनसमयश्च न निरदेशीति तन्निर्णेतुमन्तरङ्गप्रमाणान्येव शरणीकर्त्तव्यानि। श्रीमदाशाधरभट्टो वैयाकरणमतमालोचयन्—"अत्र वैयाकरणाः—'शक्तिरेव शब्दवृत्तिः, तस्याश्च प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः। व्यञ्जना तु तत्रान्तर्भवति दीर्घव्यापारादिति" इत्यादि वैयाकरणमतमुद्धृत्य प्रत्याख्यातवान्। वैयाकरणेष्वेकतमो विश्वविश्रुतनामा *नागेशभट्टो* व्यञ्जनां पृथक् वृत्तिं समर्थितवान्। *नागेशस्य* मतेऽभिधाया दीर्घव्यापारेण व्यङ्ग्यार्थप्रतीतिर्दुःशका। प्राचीनवैयाकरणास्तु अभिधाया दीर्घव्यापारे एव व्यञ्जनामन्तर्भावयन्तीति भट्टस्योद्धरणेन निश्चीयते। लघुमञ्जूषायां *नागेशो* व्यञ्जनास्वरूपं प्रदर्श्य 'अत एव निपातानां द्योतकत्वं स्फोटस्य व्यङ्ग्यता च हर्य्यादिभिरुक्ता' (पृष्ठ १३३) इति स्पष्टमुक्तवान्। अत्र *नागेशस्य* हृदयमिदमस्ति यत् स्फोटप्रतीत्यर्थं व्यञ्जनावृत्तिर्भर्त्तृहरेरपि सम्मता। यदि *नागोजीभट्टेन* प्रबलप्रमाणेन व्यञ्जना समर्थिता तर्हि कथ*माशाधरेण* व्यञ्जनाविरोधित्वेन शाब्दिकाः पूर्वपक्षे स्थापिताः। मन्ये, *नागेशस्य* नूतनोऽयं व्यञ्जनाव्यवस्थाप्रकार *आशाधरेण* नितरां न ज्ञात आसीदिति निश्चितमस्ति। अन्यथा तेन कथमेवं कथितं भवेत्। अतः प्रतीयते यत् *आशाधरभट्टो नागेशात्* प्राक्तनो भवन् *नागेश*समयं स्वीयमपरमवधिं करोति। *नागेशस्य* जन्मसमयस्तु 'काव्यमाला' ग्रन्थ-

मालायां मुद्रितरसगङ्गाधरस्य भूमिकायां म० म० पं० *दुर्गाप्रसादेन* १६८८ ईसवीयवत्सरतः १७२८ ईसवीयवत्सरपर्यन्तं जयपुरमण्डलशासकेन *सवाईमहराजजयसिंहेन* स्वकीयेऽश्वमेधयज्ञे १714 इसवीये समारब्धे नागेशभट्टः सादरमामन्त्रितः।

'क्षेत्रसंन्यासग्रहणान्नोपस्थातुं शक्यते' इति तदामन्त्रणं प्रत्याख्यातवान् इत्युल्लेखेन बेल्वेल्करमहोदयस्य कथनेन च ( Systems of Sanskrit grammar P. 49 ) *नागेशभट्टः* सप्तदशशताब्द्या अन्तिमे भागे अष्टादशशताब्द्याः प्रथमे भागे वा आसीत्। जीवत एव *नागेशस्य* सर्वा अपि कृतयः परमां ख्यातिं गता आसन्।

*आशाधरभट्ट*कृतकोविदानन्दस्यैकस्यां हस्तलिखितप्रतौ हस्तलिखितप्रतिलेखकेन १७८३ तमः शकसंवत्सरो ( इ० सन् १८६१ ) ग्रन्थनिर्माणसमयोऽङ्कितो वर्तते । *कुवलयानन्दकारिकादीपिकाया* एकस्यां हस्तलिखितप्रतौ तु दीपिकालेखनकालः १७७५ तमः शकसंवत्सरः ( इ० सन् १८५३ ) तद्धस्तलिखितप्रतिलेखकेन निर्दिष्टः। केनचित् त्रिवेणिकाहस्तलिखितप्रतिलेखकेन त्रिवेणिकालेखनकालः १८३० तमो विक्रमसंवत्सरो लिखितः । एवञ्च श्रीमदाशाधरभट्ट एकोनविंश्याः शताब्द्या मध्ये भागे तु नितरां प्रसिद्धिमाप्त आसीत्। तस्य कृतयश्च प्रायो वर्षाणां शतद्वयीं व्यत्ययापयन्।

ग्रन्थकृदयं "यद्यपि सिद्धान्तकौमुद्याम् 'इह पूर्वपदं तत्सदृशे लाक्षणिकम्' इत्युक्तम्" ( पृ० ३१ ) इति भट्टोजीदीक्षितकौमुदीमुद्धरति । भट्टोजीदीक्षितश्च १६५० तमे विक्रमसंवत्सरे वर्तमान आसीदिति श्रीगुरुप्रसादशास्त्रिसम्पादितवैयाकरणभूषणसारकाशिकाटीकाप्रस्तावनायां लिखितमस्ति । बेलवेल्करमहोदयोऽप्यत्र सम्मतो वर्तते ( Systems of Sanskrit grammar P. 43 ) अपि च *श्रीमदप्पयदीक्षितकृतकुवलयानन्दकारिकाया* दीपिकाटीकाप्यनेन कोविदानन्दकारेण सन्दब्धा । अप्पयदीक्षितश्च ख्रिस्ताब्दीयसप्तदशशताब्द्याः

प्रथमे भागे, ख्रिस्ताब्दीयषोडशशताब्द्या अन्तिमे भागे वाऽतीव विख्यातः सममूदिति काणेमहोदयो भणति । ( Introduction to Sahithya darpana ) आशाधरभट्टः सम्भवतः कौण्ड-भट्टकृतं वैयाकरणभूषणसारं सम्यक् ज्ञातवान् भवेदिति शक्तिस्वरूप-विवेचनदर्शनेन निश्चेतुं शक्यते। *भट्टोजिदीक्षितस्य* कनीयसो भ्रातुः *रङ्गोजिभट्टस्य* पुत्रः *कौण्डभट्टश्च* १६६० तमे वैक्रमे संवत्सर आसीदिति भूषणप्रस्तावनातोऽवगम्यते । उपरितनं विवेचनमधिश्रित्य प्रतिपादयितुं शक्यते *यदाशाधरभट्टः* ख्रिस्ताब्दीयाष्टादशशताब्द्या उत्तरार्द्धं स्वजन्मना भूषितवान् भवेत् । अथ चेदमपि वक्तुं पार्यते यत् प्रकृतग्रन्थलेखको नागेशभट्टात् किञ्चित्पूर्वकालिकोऽथवा तस्य ज्यायान् समसामयिक आसीदिति नीरक्षीरन्यायेन सुधियो विभावयन्तु ।

## त्रिवेणिकाया मूलभूता हस्तलिखितप्रतयः

यदुपजीव्य त्रिवेणिकेयं प्रकाश्यतां प्रणीय सुधियां सेवायां सादरं समर्प्यते, तत् किल षट् हस्तलिखिताः प्रतयः सन्ति । यासां निर्देशोऽत्र ऋते एकां प्रतिं 'क. ख. ग. घ. ङ' इत्येतैरक्षरैरत्र क्रमेण क्रियते । षष्ठी प्रतिश्च मुख्यत्वेन परिगणय्य मूलत्वेन स्वीकृतात्र 'मूलम्' इति पदेन निर्देक्ष्यते । संक्षेपेणात्र ताः परिचाय्यन्ते—

*मूलहस्तलिखितप्रतिः*—प्रतिरियं महाराज सयाजीराव विश्वविद्यालय—प्राच्यविद्यामन्दिरे समीचीनायामवस्थायां शुद्धतमा सुवाच्याक्षरा भारतीयकर्गलपत्राङ्किता सुव्यवस्थिता सुरक्षिता वर्तते । यस्या उपरि पृष्ठे विषयादिविवरणमेवमस्ति—

| | |
|---|---|
| Acc. N. 1357 | Name—त्रिवेणिका |
| ( अनुक्रमाङ्कः १३५७ ) | ( नाम „ „ ) |
| Age 1907 संवत् | Author—आशाधर |
| ( प्रतिलिपिकालः सं० १९०७ ) | ( लेखकः—आशाधरः ) |

Subject—अलङ्कारशास्त्र
( विषयः—अलङ्कार शास्त्रम् )

Script-manuskript

Extent—18 Pages ५०० श्लोक
(परिमाणम् १८ पत्राणि ५०० श्लोक)

क. हस्तलिखितप्रतिः—

A cc. N. 6138.
Author—आशाधर
Age—1860
Language—S.

Name-त्रिवेणिका (शब्दत्रिवेणिका)
Subject—व्याकरण
Extent—39—७००
Script—manus.

प्रतिरियमत्यन्ताशुद्धा।

ख. हस्तलिखितप्रतिः—

A cc. N. 1636
Name—त्रिवेणिका
Author—आशाधरभट्ट
Age—

Extent—2-12
Language—Sms.
Subject—अलङ्कार
Script—manus.

प्रतिरियं स्वच्छाक्षरा शुद्धा परमादावन्ते चापूर्णा।

ग. हस्तलिखितप्रतिः—

A cc. N. 9742
Name—त्रिवेणिका
Author—आशाधर

Age—सं० 1830
Subject—अलङ्कार
Extent—23-500

प्रतिरियमपि अशुद्धा स्वच्छाक्षरा।

घ. हस्तलिखितप्रतिः—

Acc. N. 212.
Name त्रिवेणिका।
Author आशाधर।

Age—सं० 1910.
Subject. अलङ्कारशास्त्र
Extent—Page 17-500.

## प्रतिरियमनेकत्र त्रुटिता समीचीनाक्षरा

कादारभ्य घ पर्यन्तं चतस्रोऽपि प्रतयो वटपत्तनस्थ ( बड़ौदा ) विश्व-विद्यालयप्राच्यविद्यामन्दिरे समीचीनायां परिस्थितौ सुव्यवस्थिताः सन्ति। अत्रत्या हस्तलिखितपुस्तकव्यवस्था तथा साधीयसी वर्तते यथा किमपि पुस्तकमन्वेष्टुं मनागपि समयो यापनीयो न भवति। सूची-सूचितानुक्रमाङ्कदर्शनसमकालमेव पुस्तकं नयनं स्वागच्छति। भारत-वर्षे कतिपय एव एतादृशाः पुस्तकालयाः सन्ति, यत्र तादृशी समीचीना व्यवस्था स्यात्।

ङ हस्तलिखितप्रतिः—

इयं प्रतिः वटपत्तनवास्तव्यपण्डितपञ्चानन—विद्यासुधानिधि-प्रभृतिपदवीभाजां श्रीमतां बदरीनाथकाशीनाथशास्त्रिणां सौजन्येन सम्प्राप्ता। इयमपि समीचीनाक्षराऽनवद्यावयवा तेषां पुस्तकालये वर्तते। परन्तु मुखपृष्ठे विषयादिनिर्देशो नास्ति।

## उपकारस्मरणम्

वटपत्तनस्थ संस्कृत विद्वत्सभाया वृत्तपत्रस्य सरस्वतीसौरभस्य कति-पयाङ्कसम्पादनानन्तरं कस्यचन प्राचीनस्याप्रकाशितस्य पुस्तकस्यास्मिन् पत्रे प्रकाशनं प्रचलत्विति समीहा मे मनसि दृढं स्थानं प्रापत्। तदनु मया विज्ञापिता सभाया अध्यक्षाः श्रीमन्तो बदरीनाथ काशीनाथ शास्त्रिणः तथा कर्त्तुं भूयसोत्साहेन सम्बर्द्धय त्रिवेणिकायास्तां प्रतिं मह्यं समर्प्य प्रकाशयितुं स्वानुमतिं प्रदत्तवन्तः। पुस्तकस्यास्य संशोधने सफलतायै ग्रन्थकर्तुः परिचयार्थं च महत्साहाय्यमप्याचरितं तैर्महानुभावैः। यदि ते तथा नाकरिष्यन् तर्हि ग्रन्थममुं संस्कृतसाहित्यसेवकेभ्य उपायनीकर्त्तुं नाहमपारयिष्यमिति तेभ्यो महानुभावेभ्योऽनेके धन्यवादाः समर्प्यन्ते।

वटपत्तनस्थ ( बड़ौदा ) प्राच्यविद्यामन्दिरस्याध्यक्षाः प्राच्यप्रतीच्यो-भयविद्यासपत्नीकलहकलितान्तराः सौम्यासादितशरीराः श्रीमन्तो गोविन्दलालभट्टमहोदया अप्यनेकैः साधुवादैरभिनन्द्यन्ते। येषां सौज-

न्येन ५४ हस्तलिखितप्रतयः प्राच्यविद्यामन्दिरतो मयाऽऽसादिताः। न केवलमेतावदेव, अपि तु *त्रिवेणिका*सम्पादने यद्यदपेक्षितमासीत् तत्तत् सर्वमपि साधनं समर्प्य ते मां भृशमुपकृतवन्तः संस्कृतसाहित्यानुरागं प्रदर्शितवन्तश्च। तत्र भवतां भवतां भट्टमहाभागानां सौजन्येनैव श्री*शिवरामेन्द्रसरस्वती*कृतां पातञ्जलमहाभाष्यस्य रत्नप्रकाशिकां टीकां सम्पादयितुं मयाऽधुना साधीयानवसरः सम्प्राप्तो वर्तते।

प्राच्यविद्यामन्दिरस्योपाध्यक्षाः डा० *उमाकान्तमहोदया* अपि कार्येऽस्मिन् महत् साहाय्यं कृतवन्तः सन्तीति तेऽप्यभिनन्दनशतैः संयोजनीयाः सन्ति।

यैः किल वटपत्तनस्थप्राच्यविद्यामन्दिरहस्तलिखितविभागाध्यक्षैः श्रीमद्भिः *जगन्नाथश्रीधरप*देशास्त्रिमहोदयैरनेकेषु स्थलेषु पाठनिर्णये यत् साहाय्यमाचरितं, ग्रन्थस्यास्य सम्यक् सम्पादने भूयांसः पन्थानो निर्दिष्टा आवश्यकपुस्तकादिसाधनप्रदानकार्येण च यादृशी सदाशयता प्रकटिता तदर्थं कैर्धन्यवादैस्ते महानुभावाः युज्येरन्निति व्यामुग्धचेताः सम्पादकः स्वीयं शब्ददारिद्र्यं प्रकटयन् मौनावलम्बन एव श्रेयः पश्यति।

बड़ौदासंस्कृतमहाविद्यालयस्य प्रधानाचार्याणां श्रीमतां *हरिप्रसाद*-महेतामहोदयानां भूयो भूय उपकारस्मरणं क्रियते। यत उत्साहशक्तिसम्पन्ना इमे महानुभावाः पुनः पुनः मां प्रोत्साहितवन्तः तादृशं कार्यं विधातुम्। सम्पादनस्यास्य सफलतायै समये समये समीचीनां सूचनां सन्दिष्टवन्तः सन्ति।

उक्तमहाविद्यालयस्य व्याकरणाध्यापकानां श्रीमतां *नर्मदाशङ्कर मनःसुखराम* पण्डयामहोदयानां सेवाया मूल्यन्तु मया संख्यातीतैरपि धन्यवादैः प्रत्यर्पयितुं न शक्यत इति क्षमायाचनमेव शरणीक्रियते।

प्रतिलिप्यादिसौविध्यसम्पादनेन भृशं साहाय्यमर्पितवत आयुष्मते साहित्याचार्य्य श्रीरत्नचन्द्रमहोदयायानेक आशीर्वादाः प्रदीयन्ते।

विशेषतोऽधुना तस्या वटपत्तनस्थसंस्कृतविद्वत्सभाया भूयसीं

कृतज्ञतां प्रकाशयामि, यस्याः प्रधानमन्त्रित्वपदं पुस्तकमिदं प्रकाशयितुं प्रसङ्गममुं मह्यं प्रायच्छत् ।

*व्याकरण - वेदान्त - साहित्य - सांख्ययोग - पुराणेतिहासधर्मशास्त्राचार्याः, एम्० ए०, साहित्यरत्न* पदभाजो *वाराणसेय, हरिहर संस्कृत विद्यालयस्य प्रधानाचार्याः श्रीमन्तः पं० श्रीकृष्णमणित्रिपाठी महोदया* विषमस्थले सारगर्भितां सरलां टिप्पणीं विलिख्य पुस्तकमिदं परां प्रतिष्ठां प्रापितवन्तः । त्रिपाठिमहाभागनां पुराणतत्त्वमीमांसा, पुराणपरिचयः, सावित्रीनाटकं च मौलिककृतयः कुमारसम्भवे महाकाव्ये रघुवंशे योगदर्शने सांख्यतत्त्वकौमुद्यां चन्द्रप्रभचरिते च महोपयोगिन्यो हृदयङ्गमाः संस्कृतहिन्दीटीकाश्चापि सन्तीति तेऽनेकान् धन्यवादानर्हन्ति ।

अन्ते काशीस्थ *भारतीय-साहित्य - विद्यालय ग्रन्थमालाप्रकाशनव्यवस्थापकमहोदयस्य* कृतज्ञतामाविष्कुर्वन् नितरामानन्दमनुभवामि यस्य सुरभारतीसेवापरिणामेन प्रकाशनप्राविण्येन च *त्रिवेणिकेयं* सुरभारतीसमुपासकानां विमलाशयानां सुमनसां सेवायां समर्पयितुमीशोऽस्मि संवृत्तः । ग्रन्थस्यास्य सम्पादने मानवसहजदोषभ्रमप्रमादादिजन्यां मुद्रणादिसमुद्भवाञ्च त्रुटिं करुणावरुणालया विद्वांसो विस्मरिष्यन्तीति विनिवेद्य भगवतो भूतभावनस्य पादपद्मे मनसा समभ्यर्च्य च विरमति—

*महाराज सयाजिराव विश्वविद्यालय,*
*बड़ौदा*
*माघी पूर्णिमा, २०१३*

**कालिकाप्रसाद शुक्लः**

*विजयतां सुरभारती*

# विषय-सूची


| विषयः | पृष्ठम् |
|---|---|
| मङ्गलश्लोकः | १ |
| **वृत्तिसामान्यनिरूपणम्** | १–६ |
| वृत्तिशब्दस्य सदृष्टान्तं करण-साधनत्वप्रदर्शनम् | १ |
| वृत्तिशक्तिशब्दयोः पर्यायत्वे साहित्यदर्पणोदाहरणम् | २ |
| ग्रन्थस्यास्य त्रिवेणिका भिधाने युक्तिप्रदर्शनपुरस्सरं शक्तिभक्तिशब्दानां करणसाधनत्वप्रदर्शनं त्रिवेणिकानिर्वचनञ्च | २ |
| काव्यादिषु शब्दजन्यस्यार्थ-ज्ञानस्य सोदाहरणं त्रैविध्यप्रति-प्रतिपादनम् | ३–५ |
| वृत्तिविषयभूतस्यार्थस्य त्रैविध्यप्रतिपादनम् | ५ |
| शब्दानां त्रैविध्यम् | ५ |
| वृत्तेस्त्रैविध्यम् | ६ |
| **शक्तिविवेचनम्** | ६–१७ |
| शक्तिलक्षणम् | ६ |
| शक्तेस्त्रैविध्यसमर्थनम् | ६–७ |
| भेदत्रयस्य, अवान्तरभेदस्य चोदाहरणम् | ७–९ |
| शक्तिग्राहकव्याकरणादीनां नामोल्लेख उदाहरणानि च | ९–१० |
| अनेकार्थस्य शब्दस्य प्रकृतार्थे शक्तिनियामकानि | १०–१७ |
| लक्षणालक्षणम् | १८ |
| लक्षणात्रैविध्यम् | १८ |
| त्रिविधलक्षणायाः पुनर्द्वैविध्यम् | १८–१९ |
| व्यधिकरणसमानाधिकरणभेदेन लक्षणाया द्वैविध्यम् | १९ |
| गौणी शुद्धाभेदेन लक्षणाया द्वैविध्यम् | १९ |
| व्यधिकरणविषयफलवज्जहल्ल-क्षणाया उदाहरणानि | १९-२० |
| व्यधिकरणविषयफलवदजहल्लक्षणाया उदाहरणानि | २० |
| फलवज्जहदजहल्लक्षणाया उदा-हरणानि | २०–२२ |
| प्राचीनानुसारेण-अगूढफलाजह-ल्लक्षणाया उदाहरणम् | २२ |
| कार्यकारणभावादौ शुद्धाया-जहल्लक्षणाया उदाहरणम् | २३ |

| विषयः | पृष्ठम् |
|---|---|
| निरूढाऽजहल्लक्षणाया उदाहरणम् | २४ |
| मतभेदप्रदर्शनम् | |
| निरूढजहदहल्लक्षणाया उदाहरणम् | २५ |
| लक्षणाप्रयोजकसम्बन्धनिरूपणम् | २५ |
| लक्षणाप्रयोजकसामीप्यसम्बन्धस्योदाहरणम् | २५–२६ |
| लक्षणाप्रयोजकसमवायसम्बन्धस्य भेदा उदाहरणानि च | २६–२८ |
| लक्षणाप्रयोजकविशिष्टबुद्धिजनकसम्बन्धस्य भेदा उदाहरणानि च | २६–३० |
| 'त्रिविधसम्बन्धस्य साक्षात्त्वमेव लक्षणाप्रयोजकम्' इत्यस्य खण्डनम् | ३०–३१ |

| विषयः | पृष्ठम् |
|---|---|
| गौण्या लक्षणाया विशेषप्रतिपादनम्, तत्र मतान्तरप्रदर्शनम्। | ३१–३२ |
| लक्षणाया आवश्यकत्वप्रतिपादनम् | ३२ |
| व्यञ्जनानिरूपणम् | ३३ |
| भूमादीनां व्यञ्जनागम्यत्वप्रतिपादनम् | ३४ |
| लक्षणामूलाया व्यञ्जनाया उदाहरणम् | ३४–३५ |
| व्यञ्जनामूलव्यञ्जनाया उदाहरणम् | ३५–३६ |
| व्यञ्जनाविषये तार्किकमतखण्डनम् | ३६ |
| व्यञ्जनाविषये वैयाकरणमतखण्डनम् | ३६–३७ |

* श्रीसरस्वत्यै नमः *

श्रीमदाशाधरभट्टविरचिता—

# त्रिवेणिका

प्रणम्य पार्वतीपुत्रं[a] कोविदानन्दकारिणा ।
आशाधरेण क्रियते पुनर्वृत्तिविवेचना ॥ १ ॥

## अथ वृत्तिप्रकरणम्

वर्तते—शब्दोऽर्थे प्रवर्तते, अनयेति वृत्तिः । 'बाहुलकात्' करणे क्तिन् प्रत्ययः । दृश्यते ह्यन्यत्रापि[1] करणे क्तिन्,[2] यथा अन्तःकरणवाचकबुद्धिशब्दे, प्रेमवाचकभक्तिशब्दे चेत्यादौ[3] । अतएव भागवत-सुबोधिन्यां—'धात्वर्थः-सेवा, प्रत्ययार्थः-प्रेमे'त्युक्तम् ।

मल्लिनाथेन च 'पूज्येष्वनुरागो भक्तिरित्युपदेश'[b] इत्युक्तम् ।

---

मू. टि. a केन-सुखेन विन्दन्तीति कोविदाः-चतुरा । पृषोदरादित्वात् साधुः । कं वारिसुखमूर्द्धस्वित्यमरः ।

b सः चोक्तः शाण्डिल्यविद्यायाम्—"अथातो भक्तिर्जिज्ञासा, सा परानुरक्तिरीश्वरे तत्स्थस्यामृतत्वोपदेशादिति ।

---

१. क. 'त्वन्यत्रापि' इति पाठः । २. क. ख. 'क्तिन् प्रत्ययः इति पाठः ।
३. क. 'प्रेमशब्दवाचकभक्ति शब्दे' इति पाठः ।

साहित्यदर्पणे (परि० २, कारिका ३) तु[१] वृत्तिशब्दस्थाने शक्तिशब्दो दृश्यते।

शक्ति भक्ति व्यक्ति गङ्गा यमुना गूढनिर्झराः।
प्रवाहवत्यः[२] सन्त्यत्र यत्तदेषा त्रिवेणिका॥

शक्यते—साक्षादभिधीयतेऽनयेति शक्तिः। 'बाहुलकात्' करणे क्तिन् प्रत्ययः।* धातूनामनेकार्थत्वाच्छक्नोतेः साक्षादभिधानार्थत्वम्।

भज्यते—शक्यार्थः खण्ड्यतेऽनयेति[३] भक्तिर्लक्षणा। 'भञ्जो आमर्दने' इति धातोः करणे क्तिन् प्रत्ययः। अथवा भज्यते—सेव्यतेऽर्थान्तरमनयेति भक्तिः 'भज सेवायाम्' इति धातोः क्तिन्।

व्यज्यते—प्रकटीक्रियतेऽर्थोऽनयेति[४] व्यक्तिर्व्यञ्जना। [a]गूढनिर्झरा सरस्वती। एषा वृत्तिविवेचना।

तिसृणां [b]वेणीनां समाहारः त्रिवेणि, त्रिवेणीव त्रिवेणिका। अथवा तिस्रो वेण्यो यस्याः सा त्रिवेणी, त्रिवेण्येव त्रिवेणिका इति स्वार्थे कन्।

---

मू. टि. a गूढोऽस्फुटः निर्झरः-प्रवाहो यस्याः सा सरस्वतीत्यर्थः।

b ओघः प्रवाहो वेणी चेत्यमरः। टि. अयमत्राभिसन्धिः-यथा प्रयागे गङ्गायमुनयोः प्रवाहः स्फुटः सरस्वत्याश्चास्फुटः, तथैव काव्येऽभिधया प्रतिपाद्यो लक्षणया लक्ष्यश्चार्थः स्फुटः, व्यञ्जनया व्यङ्ग्योऽर्थो न स्फुट इति त्रिवेणीसादृश्यात् त्रिवेणिकेति।

---

१. क. 'तु' इति नास्ति। २. क. 'निर्वाहवत्यः' इति पाठः। ३. ग. 'त्यज्यते' इति। ४. क. ख. 'अर्थः' इति नास्ति।

---

टि. * धातूनामनेकार्थत्वादिति—'अनादरः, परिभवः, परिभावस्तिरस्क्रिया' इति कोशात् परिपूर्वकभूधातोरवज्ञानेऽर्थे घञि सिद्धे पुनः "परौभुवोऽवज्ञाने" (पा. सू. ३।३।५५) इति सूत्रेण घञ्विधानं ज्ञापयति—'धातूनामनेकार्थत्वमिति। अथवा "कुर्द, खुर्द, गुर्द, क्रीडायामेव" अत्र 'एव' पदमुक्तार्थे ज्ञापकम्। धातूनामनेकार्थत्वाभावे तद्वैयर्थ्यं स्पष्टमेव।

काव्यादिषु शब्दजन्यमर्थज्ञानं[1] * त्रिविधम्—चारु, चारुतरं, चारुतमञ्चेति । अत्र[2] शक्तिजन्यं चारु, यथा 'पाकं कुरुष्व पाकार्थमि'ति । अत्र पाकशब्दस्य[a] शिशुवाचकत्वमन्वयबोधश्च व्युत्पन्नानामेव† भासत इति चारुत्वम् । यत्तु 'चणकांश्चर्वति गालिं च ददाति' इत्यादिग्राम्यवाक्यजन्यमचारु न तत् कविभिरा-द्रियते । लक्षणाजन्यं चारुतरं, यथा दधिद्रोणक्रयकामेन केनचित् कश्चिद् गोपालः पृष्टः—'प्रातर्दधि दास्यसि, क्व ते निवासः ?' इति । तेनोक्तं[3] 'दास्यामि, गङ्गा तटे मे घोषः' इति । तच्छ्रुत्वा दूरात् कथमानेतुं शक्यमित्युपेक्षितः सः । पुनश्चान्यः पृष्टः—'प्रातर्दधि दास्यसि[4] क्व ते निवासः ?' इति । तदा तेनोक्तं 'दास्यामि, गङ्गायां मे घोषः' इति । तदा नागरिकस्य चेतस्या-गतमेतदीयमेव[5] दधि ग्राह्यमिति । यतो गङ्गाप्रवाहनिकटेऽयं वसति, वृक्षवातादिसद्भावात् पथि तापादिबाधश्च न स्यादिति सुखित-पशुजन्यत्वात् स्वादुतरं गङ्गाम्भःसम्बन्धात् पावनं चेति चारु-

---

a मू. ग.टि. पोतः, पाको,ऽर्भको, डिम्भः, पृथुकः, शावकः, शिशुरित्यमरात् ।

१. ग. 'शब्दजन्मार्थज्ञानम्' इति पाठः । २. क. ख. ग. घ. 'तत्र' इति पाठः । ३. ख. 'तदा' इत्यन्तरं 'तेनोक्तम्' इति पाठः । ४. ख. 'दास्यति' इति पाठः । ५. ख. 'एतद्दधि' इति पाठः ।

---

* अर्थज्ञानमिति—काव्यगतत्रैविध्यं ज्ञाने आरोपितं बोध्यम्, अलङ्कारशास्त्रे काव्यस्यैव त्रैविध्यप्रतिपादनात् ।

† व्युत्पन्नानामेवेति—व्युत्पत्तिः—व्याकरणकाव्यकोशादिजन्यं ज्ञानम् । शिशुत्वावच्छिन्नार्थनिरूपितशक्तिमान् 'पाकशब्दः' इति कोशादिजन्यज्ञानवता-मेवेत्यर्थः । वस्तुतस्त्वत्र 'एव'पदमप्यर्थकम्, अव्युत्पन्नानां बोधस्य व्यावर्त्यत्वे-नानभिप्रेतत्वात्, वृत्तिज्ञानाभावादेव तेषां बोधाभावस्य सुतरां सिद्धत्वात् । परन्तु कैमुतिकन्यायेन 'यदि केवलव्युत्पत्तिशालिनामपि बोधो भवति तर्हि का कथा काव्य-वासनापरिणतमतीनां सहृदयानामिति वाच्यार्थस्य न चारुतमत्वम् । व्य-ङ्ग्यार्थस्तु सहृदयैरेव प्रतीयत इति तस्य चारुतमत्वम् इति भावः ।

तरत्वम् । अन्यथा[a] स्वायत्ते[b] शब्दप्रयोगे किमित्यवाचकशब्दाः[१] प्रयुज्यन्ते ।

यद्यपि घोषस्य प्रवाहनिकटवृत्तित्वज्ञानं[२] लक्षणाजन्यं[३] तदधिकज्ञानं तु व्यञ्जनाजन्यमिति सिद्धान्तः, तथापि सा व्यञ्जना लक्षणामूलेति लक्षणाजन्यत्वं न विहन्यते । अत एवेदं* लक्षणाफलमित्याहुः । अतश्च फलवतीयं लक्षणा । निरूढलक्षणायाः† शक्तितुल्यत्वात्तज्जन्यं चार्वेव ।

व्यञ्जनाजन्यं चारुतमं, यथा[c] शक्रध्वजोत्थापने उद्यानिका‡भोजनानन्तरमुपविष्टेन राज्ञा सूपकार आज्ञप्तः 'अहो ! शीघ्रं भृत्यान् भोजय गतोऽस्तमर्क' इति । ततः शब्दशक्त्या विवक्षितार्थं ज्ञात्वा सूपकारो गतः । अथ व्यञ्जनया ब्राह्मणानां[४] 'सन्ध्यासमयो[५] जात' इति बोधो जातः । सारथीनाञ्च 'रथसंयोजनसमयो[६] जात'

---

a मू. इ. टि. फलाभावे । b मू. क. ध. ड. टि. स्वाधीने ।
c मू. टि. "चतुः स्तम्भं ध्वजाकारं पुरद्वारे प्रतिष्ठितम् ।
पौराः शरदि कुर्वन्ति स शक्रध्वज उच्यते ॥ ×

---

१. क. 'अवाचकः प्रयुज्यते' इति पाठः । २. ख. 'प्रवाहनिकटवर्त्तित्वज्ञानम्' इति पाठः । ३. ख. 'लक्षणाजन्यमिति' इति पाठः । ४. ङ. 'ब्राह्मणादीनाम्' इति पाठः । ५. घ. 'सन्ध्यावन्दनसमयः' इति पाठः । ६. क. ग. घ. 'रथयोजनसमयः' इति पाठः ।

---

* इदमिति—व्यञ्जनाजन्यम् अतिशयशैत्यपावनत्वादिज्ञानम् ।

† निरूढेति—असति प्रयोजनेऽनुपपत्तिप्रतिसन्धानपूर्वकं तत्सम्बन्ध्यपरार्थबोधे निरूढा लक्षणेति व्यवह्रियते । यथा 'त्वचा ज्ञातम्' इत्यादिस्थले त्वक्पदस्य त्वगिन्द्रिये प्रयोजनरहिता लक्षणा निरूढा ।

× घ. पुस्तके मूल एवायं 'यथा शक्रध्वजः' इत्यनन्तरमुपरिनिर्दिष्टः श्लोकः, तदनु 'तस्योत्थापने' इति पाठः । 'पौराः' इत्यस्यस्थाने 'लोकाः' इति च पाठः ।

‡ उद्यानिकाभोजनम्—उपवनभोजनम् ।

इति । दीपिकाधारिणाञ्च[१] 'तत्समयो* जातः' । एवमन्येषां नानाविधो बोधो जात इति चारुतमत्वम् । अत एव निरवधिर्व्यङ्ग्योऽर्थः ।

यद्यपि नापितगोपालादीनामपि दीपप्रद्योतनगोदोहनादिसमयो जात इति व्यङ्ग्यार्थभानमस्ति, तथापि चारुतमत्वं न विहन्यते,[२] राजसेवकानामतिचतुरत्वात् । चारुतमत्वं ह्यतिचतुरवेद्यत्वम्[३] इति ।

अथवा राज्ञा[४] बोधनीयत्वेन ब्राह्मणादयो बुद्धिमत्तमा अभिमताः । तेषां सन्ध्यानादरदर्शनेन क्रोधोत्पत्तेः । अन्येषां तु प्रसङ्गाद् बोध इति न कश्चिद्[५] विरोधः ।

वृत्तिविषयभूता अर्थास्त्रिविधाः । तत्र आद्यः शक्यो, वाच्योऽभिधेयो, मुख्यार्थश्चेत्युच्यते । द्वितीयो-लक्ष्यो, लाक्षणिको, भाक्त, औपचारिकश्चेति व्यपदिश्यते[६] । तृतीयो-व्यङ्ग्यो, गम्यः, प्रतीत्यो, द्योत्यो, ध्वनितः इति च व्यवह्रियते ।

अर्थत्रयानुसारेण शब्दा अपि त्रिविधाः । तत्राद्यो-वाचकः,[a] शक्तोऽभिधायकश्चेत्युच्यते । द्वितीयो-§लक्षको, लाक्षणिक, औपचारिको, भाक्तश्चेति व्यपदिश्यते । तृतीयो-व्यञ्जको, गमको, ध्वननो,[७] द्योतकः, प्रत्यायकश्चेति व्यवह्रियते ।

मू. टि. a शाकक इति रूढ्यभावात् न प्रयुज्यते ।

१. ग. घ. 'च' इति नास्ति । २. ग. ङ. 'हीयते' इति पाठः । ३. ख. § 'वेद्यम्' इति पाठः । ४. क. ग. घ. ङ. 'राज्ञो' इति पाठः । ५. ग. घ. ङ. 'कश्चिद्' इति नास्ति । ६. ङ. 'व्यवह्रियते' इति पाठः । ७. घ. ङ. 'ध्वनकः' इति पाठः ।

* तत्समयः—दीपिकाधारणसमय इत्यर्थः ।

† अत्र 'वेद्यत्वम्' इत्येव पाठः साधीयान्, लक्ष्यतावच्छेदकसमनियतधर्मस्यैव लक्षणत्वमिति सिद्धान्तात् । लक्ष्यतावच्छेदकञ्चात्र चारुतमत्वम् ।

तद्वशात्तिस्रो वृत्तयो भवन्ति । वृत्तिः, व्यापारः, क्रिया चेति पर्यायशब्दाः । तत्राद्या शक्तिरभिधा, मुख्या चेत्युच्यते । द्वितीया लक्षणा, भक्तिरुपचारश्चेति व्यपदिश्यते । तृतीया व्यक्ति-र्व्यञ्जना, द्योतना, ध्वनना प्रत्यायना चेति व्यह्रियते । तत्रार्थानां योग्यार्थे व्युत्पत्तिः । शब्दानां कर्त्रादिषु वृत्तिवाचकानां करणे चेति सम्प्रदायः ।

इति वृत्तिप्रकरणम् ।

## अथ शक्तिप्रकरणम्

वृत्तित्रयमध्ये संकेतसहकारिणी शक्तिः । संकेतस्तु 'अस्मा-च्छब्दादयमर्थो बोध्य[१] इति प्रवर्त्तकोपदेशः । स च शब्दे स्थितो ज्ञातः सन् अर्थं विषयीकरोति ।

[a]तत्र चत्वारि प्रवृत्तिनिमित्तानि—गवादिषु जातिः, शुक्लादिषु[२] गुणः, पाचकादिषु क्रिया, डित्थादिषु संज्ञा चेति । अत एव चतुष्टयी शब्दानां प्रवृत्तिरिति भाष्यकारः । विस्तरस्तु कोविदानन्दे द्रष्टव्यः । संकेतस्त्वर्थस्थितं पुरुषाज्ञानम्* उत्सार्य ज्ञातृत्वं[३] जनयति । तत्र शब्दवत्तत्र गता क्रियापि करणं, प्रदीपस्य करणत्वे[४] सति तत्प्रभावत् । सैव शक्तिः ।

सा त्रिधा[५] योगो, रूढिर्योगरूढिश्चेति । ननु सुबन्तं तिङन्तं

मू. टि. a तत्र—संकेतज्ञाने ।

१. 'बोद्धव्यः' इति पाठः । २. क. ङ. 'शुभ्रादिषु' इति पाठः । ३. ख. 'ज्ञातत्वम्' इति पाठः । ४. ख. ङ 'करणत्वे' इति पाठः । ङ. 'करणत्वेन' इति पाठः । ५. ख. ग. घ. ङ. 'त्रिविधा' इति पाठः ।

टि. * पुरुषाज्ञानमिति—अर्थविषयकं पुरुषसमवेतं यत् ज्ञानं तस्याभाव इत्यर्थः, ज्ञानस्य समवायेनात्मनि वर्तमानत्वात्, अर्थे ज्ञानाभावश्च विषयता-सम्बन्धावच्छिन्नप्रतियोगिताको बोध्यः ।

चेति द्विविधं पदम्, तत्राद्यस्य प्रकृतिप्रत्यययोगसद्भावात्, द्वितीयस्य च[१] 'सर्वमाख्यातजं नामे'ति निरुक्तवचनात्, यथा कथञ्चित् योगसंभवात्[२] एक एव भेद इति चेत्! सत्यम्,

[a]निपातादीनां व्युत्पत्तिकल्पने प्रक्रियागौरवात्[b] । फलाभावाच्च भेदद्वयं स्वीकार्यमेवेति । तथा चोक्तं रसप्रदीपे—

भवेतां यदि वृक्षेषु वाजिकर्णौ कथञ्चन ।
तदा रूढिं परित्यज्य योगमेव समाश्रयेत् ॥

ननु तर्हि रूढिरेव मन्तव्या, भेदद्वयंश्च[३] हेयमिति चेन्न, रूढ्या केवलया निर्वाहे व्याकरणशास्त्रमनारम्भणीयं* स्यात् । पाचकाद्यर्थबोधश्च न स्यात् । योगरूढौ तु प्रायेण समप्राधान्यम् । क्वचिदन्यतरप्राधान्येऽपि न दोषः, यथा "पद्मानि यस्याग्रसरोरुहाणि" इत्यत्र योगप्राधान्यं, तेन पद्मशब्दप्रयोगे पुनरुक्तिदोषो नास्ति ।

"उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः"

इत्यत्र रूढेरेव प्राधान्यम्, अन्यथा स्थलनलिनीकुसुमस्य सरसिजत्वासंभव इति तत्रावयवयोगप्रधाना योगशक्तिः । संकेतप्रसिद्धिप्रधाना रूढिः[c] । उभयप्रधाना योगरूढिश्च ।

अथ भेदत्रयस्य क्रमेणोदाहरणानि, तत्र सुप्तिङन्तयोः- 'कृष्णो भवती'त्यादौ प्रकृतिप्रत्ययजन्या योगशक्तिः । नामपदे

---

टि. a अलाक्षणिको विधिर्निपातः । b प्रकृतिप्रत्ययादिभागेन शब्दव्युत्पत्तिः प्रक्रिया ।

c "लक्षणैर्नोपपन्नस्य योगस्य च कथञ्चन ।
बहुसिष्टाद्रव्यत्वं ( बहुशिष्टादृतत्वं ) हि रूढिरित्यभिधीयते"

अखण्डशक्तिमात्रेणैकार्थप्रतिपादकत्वमिति रूढिः ।

---

१. क. ख. ङ. 'च' इति नास्ति । २. क. ख. घ. 'सद्भावात्' इति पाठः । ३. क. 'च' नास्ति ।

---

* अनारम्भणीयमिति । ननु मास्तु आरम्भः, न हि केनचिदारब्धं गुरुभूतमादृत्य स्वयमपि गौरवमारभेतेत्यरुचेराह—'पाचके'त्यादि ।

सनाद्यन्तधातुपदे च कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च-वृत्तयः। परार्थाभिधानं वृत्तिरितिवृत्तिलक्षणम्। तदनुसारात् पञ्च-विधा योगशक्तिः। [१]क्रमेणोदाह्रियते—पाचकः कर्त्तरि। पक्वः कर्मणि। पाको भावे। पचनोऽग्निः करणे। पचनी स्थाली अधिकरणे। बिभेत्यस्मादसौ[२] भीमः अपादाने। दानीयो विप्र इति संप्रदाने। 'दातुं भुक्त्वा' इति अव्ययकृतो भावे इति कृदन्तो-दाहरणानि।

औपगवः, धनी, देवदत्तकः, एकधा, एकशः, सकृत्; इत्यादि[३] तद्धितोदाहरणानि।

उपराजम्, राजपुरुषः, पञ्चराजम्, शूरराजः राजपुरोहितौ, राजमित्रः, 'न खलु न खलु वाणः सन्निपात्योऽयमस्मिन्', 'नहि नहि करिकुम्भोऽसौ',[४] अत्र निपातद्वयस्य समासाभावे वीप्सायां 'न खलु न खलु' 'नहि नहि' इति प्रयोगापत्तेः। सुप्सुपेति समासः। एवं 'यद्यपि' 'तथाप्यथवा' यद्वेत्यादौ द्रष्टव्यम्' समासफलं तु व्यस्त-प्रयोगाभावः, इति समासोदाहरणानि। 'जगतः पितरौ' 'त्रयो देवाः' 'द्वौ पन्थानौ' इत्येकशेषः। चिकीर्षति, पण्डितायते, पुत्रकाम्यति, 'प्रासादीयति कुटयाम्'इति सनाद्यन्तोदाहरणानि। इति योगशक्तिः।

अथ रूढिः—गच्छतीति गौः, पातीति पतिः,[५] पातीति पुमान्, इत्यादि व्युत्पत्तिकल्पनेऽपि रूढिरेव, अर्थबोधे व्युत्पत्तेर-नुपयोगात्। उक्तञ्च "उणादयोऽव्युत्पन्नानि प्रातिपदिकानी"ति। एवं डित्थकपित्थादिशब्दानामपि[६] "सर्वमाख्यातजं नामे"ति वचनात् व्युत्पत्तिसम्भवेऽपि[७] रूढिरेव।

---

१. ग. 'उद्दाहरणानि' इति पाठः। २. क. 'इति' इत्यधिकः पाठः। ३. क. 'इति' इति पाठः। ४. क. ख. ग. घ. ङ. 'करिकलभोऽसौ' इतिपाठः। ५. क. ख. ग. घ. ङ. पातीति पिता, गच्छतीति गङ्गा' इत्यधिकः पाठः। ६. ख. ग. घ. 'दित्थ' 'वल्मीककीटसमुद्धृतमृत्पिण्डो दित्थः' इति पाठः। ङ. 'डवित्थ' इति पाठः। ७. घ. 'कल्पनेऽपि' इति पाठः।

अथ योगरूढ़िः—युधिष्ठिरः; युधि स्थिर[1] इति योगः- ज्येष्ठ पाण्डवे रूढ़िः । वनेचरः-वने चरतीति योगः-किराते रूढ़िः । पङ्कजं, जलजं, सरोजम् , इति योगरूढ़िः ।

यद्यपि संकेतः सनातनः, शक्तिस्तु प्रयोगकाले प्रकटीभवतीति निर्णयः कोविदानन्दे, तथापि व्यवहारे शक्तिसंकेतयोरभेदनिर्देशः ।

अथ कोविदानन्दस्थक्रमेण शक्तिग्राहकाण्युच्यन्ते—व्याकरणम् , कोशः, निरुक्तम् , मुनिवाक् , व्याख्यानम् , वाक्यशेषः, प्रसिद्धार्थपदसंनिधिः, उपमानम् , व्यवहारः । तान्युदाहियन्ते—

पाकं कुरुष्व पाकार्थं, चामुण्डां विखरे कुरु ।
अजो विधिस्तं चाजेन यजेताजार्थधर्मधीः ॥ १ ॥
हिङ्गुलं पद्मरागाभं तद्वर्णा हिङ्गुलाम्बिका ।
यामम्बेति वदन्त्यार्या अन्येऽल्लेति स्तुवन्ति च ॥ २ ॥

पाकं कुरुष्व[2] पाकार्थमिति-अत्र पाकमित्यस्य भावे घञन्तत्वात् व्याकरणं शक्तिग्राहकम् । पाकार्थमिति—"पोतः, पाकोऽर्भको, डिम्भः, पृथुकः, शावकः शिशुः" इतिकोशात् अत्रार्भकमित्यर्थे ( अर्भक इत्यर्थे ) कोशः शक्तिग्राहकः । चामुण्डामिति-चण्डमुण्डौ गृहीत्वाऽऽगता 'चामुण्डा' इत्यत्र निरुक्तं शक्तिग्राहकम् । "अक्षरसाम्यान्निर्वचनंब्रूयात्" [3] इति वचनाद् व्युत्पत्तिं विनापि अक्षरसाम्यमात्रेणार्थबोधात् । तदुक्तं मार्कण्डेयपुराणे—

यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि[4] ॥ इति

एवं "देवानां सुप्रसंशत्वाद् दमाद्दामोदरं विदुः" ( महाभा० )

---

१. क. 'तिष्ठति' इति पाठः । २. क. ग. 'पाकार्थम्' नास्ति । ३. क. ङ. 'निर्वचनम्' नास्ति । ४. ग. घ. 'भविष्यतीति' पाठः ।

इत्यादिष्वपि द्रष्टव्यम्। निरुक्तस्याप्तवाक्येऽन्तर्भावात्[१] न प्राचीनैः पृथक् गणितमिति बोध्यम्।

'विखरे कुरु' विखरो-बुद्धिस्तत्र कुरु-चिन्तयेत्यर्थः। अत्र विखरशब्दस्य बुद्धिवाचकत्वे लिङ्गपुराणस्थं मुनिवचनं शक्तिग्राहकम्। 'अजो विधिः' अत्राजशब्दस्य[a] प्रजापतिवाचकत्वे विधिपर्यायरूपं व्याख्यानं शक्तिग्राहकम्। 'तत्राजेन छागेन यजेत' अत्राजशब्दस्य छागवाचकत्वे पूर्वापरवाक्यशेषः शक्तिग्राहकः। अजार्थधर्मधीः-इत्यत्राजशब्दस्य कामवाचकत्वेऽर्थधर्मशब्दयोः सन्निधिः शक्तिग्राहकः।

हिङ्गुलमिति—पद्मरागाभं माणिक्यसदृशम् इत्युपमानं शक्तिग्राहकम्। हिङ्गुलानाम्नी देवी तद्वर्णा हिङ्गुलसदृशीत्यत्र तथैव। 'यामम्बेति वदन्त्यार्याः'-ब्राह्मणादयो यां देवीमम्बेति नाम्ना वदन्ति (ताम्) अन्ये यवनादयोऽल्लेति स्तुवन्ति। अत्र शब्दद्वयस्य देवीवाचकत्वे[२] तद्विदां व्यवहारः शक्तिग्राहकः। व्यवहाराभावादेव वेदोक्तमल्लासूक्तं बहवो ब्राह्मणा न पठन्ति। एवमन्यत्रापि स्वयमूह्यमिति[b] शक्तिग्राहकाणि।

कोविदानन्दस्थक्रमेणानेकार्थस्य शब्दस्य प्रकृतार्थे शक्तिनियामकान्युच्यन्ते—लिङ्गं प्रकरणं, फलं, व्यक्तिः, प्रसिद्धसान्निध्यम्,

मू. टि. a "अजो, हरौ, हरे, कामे, विधौ, छागे, रघोः सुते", इति विश्वः

मू. टि. b नचैकं व्याकरणमेव प्रसिद्धतया सर्वत्र शक्तिग्राहकम्,

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः

(इत्यभियुक्तोक्त्योपमानादीनामपि शक्तिग्राहकत्वस्य भूयोभूयो दृष्टत्वात्)

१. क. 'आप्तवाक्येतरत्वाभावान्न' इति पाठः। २. क. 'देवीवाचकत्वेन' इति पाठः।

[a]आर्हन्ती, समर्थता, देशः, कालः, चेष्टा, साहचर्यं, विरुद्धता, संयुक्तत्वं, वियुक्तत्वं, स्वरादयश्चेति ।

अथोदाहरणानि—तत्र लिङ्गं [१]यथा-'चतुर्भुजं हरिं वन्दे' इति । 'चक्रहस्तमि'ति पाठेऽपि[२] चक्रस्य विष्णुलिङ्गत्वमस्त्येव । असाधारणं हि गमकं[३] लिङ्गमुच्यते[४] तेनात्र हरिशब्दस्य विष्णौ शक्तिर्नियम्यते । एवं 'सहस्राक्षो हरिः सेव्य' इत्यत्र हरिशब्दस्य शक्रे शक्तिर्नियम्यते । 'वज्रहस्त'[५] इति पाठेऽपि[६] तथैव । प्राचीनानां 'कुपितो मकरध्वज' इत्युदाहरणं तु क्लिष्टमित्यवधेयम् ।

प्रकरणम्—'हरिर्हि निर्गुणः[७] साक्षात्' । इति अत्र पौर्वापर्य-सम्बन्धरूपेण प्रकरणेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते । एवं 'गुरुर्गरीयान् दुखस्थितः[८] कृतः' अत्र रेणुकां प्रति परशुरामवाक्ये प्रकरणेन गुरुशब्दस्य पितरि शक्तिर्नियम्यते । फलं यथा 'मुक्तये[b] हरिं भजति' अत्र मुक्तिरूपफलेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते । 'स्थाणुं भज भवच्छिदे' इत्यत्र स्थाणुशब्दस्य शम्भाविति ।

व्यक्तिर्यथा—व्यक्तिर्नामार्थः,[c] स च[९] पञ्चविधः, जाति-व्यक्तिलिङ्गसंख्याकारकभेदात् । तत्र जातिर्यथा—'भद्रनागो महाधनः' अत्र जातिविशेषवाचिना भद्रशब्देन नागशब्दस्य गजे शक्ति-

---

a योग्यता ।

टि. b आरोग्यं भास्करो दत्ते धनं दत्ते हुताशनः ।
दत्ते ज्ञानं च सर्वज्ञो दत्ते मोक्षमधोक्षजः ॥ रेवाखण्डे ।

टि. c एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ (वैया.भू.३५कारिका)

---

१. क. ख. 'यथा' नास्ति । २. क. ङ. 'अपि' नास्ति । ३. क. ख. 'बोधकम्' पाठः । ४. क. ख. 'उच्यते' नास्ति । ५. ग. 'वज्रहस्तम्' इति पाठः । ६. घ. 'अपि' नास्ति । ७. ख. 'हि' नास्ति । ८. ङ. 'दुःखस्थितः कृतः' इति पाठः । ९. ख. ग. घ. 'च' नास्ति ।

नियम्यते। 'भद्रो मन्द्रो मृगो मिश्रश्चतस्रो गजजातयः' इति हैमः व्यक्तिर्यथा—'शिवोपवीतनागेन' अत्र शिवोपवीतशब्देन शेषव्यक्तिरुच्यते, तया च नागशब्दस्य [1]सर्पे शक्तिर्नियम्यते। लिङ्गं यथा—'स्वानि शिवं याचति' अत्र स्वशब्दस्य नपुंसकवृत्त्या[2] धने शक्तिर्नियम्यते। एवं [a] मित्रो यजतीत्यत्र मित्रशब्दस्य पुंस्त्ववृत्त्या सूर्ये शक्तिर्नियम्यते। सङ्ख्या यथा—'हरिर्वसति कानने' अत्रैकत्वेन हरिशब्दस्य सिंहे शक्तिर्नियम्यते। 'यमौ[b] विलोकयन्' अत्र द्वित्वेन यमशब्दस्य युग्मजातार्थे शक्तिर्नियम्यते। 'हरयः सन्ति कानने' अत्र बहुत्वेन[3] हरिशब्दस्य वानरेषु[4] शक्तिर्नियम्यते। कारकं यथा—'अब्धितटे दुष्टो हरिर्हरिणा हतः' अत्र कर्त्तृत्वेन हरिशब्दस्य वासुदेवे शक्तिर्नियम्यते। कर्मत्वेन च हरिशब्दस्य वानरे शक्तिर्नियम्यते। तत्र हि बलभद्रेण[5] द्विविदाख्यो वानरो हतः। 'दुष्टमरिं[6] हरिर्हतवान्' अत्र कर्त्तृत्वेन हरिशब्दस्य वासुदेवे शक्तिर्नियम्यते। तस्य शङ्खासुरहन्तृत्वात्। यत्तु* प्राञ्चः, पुंस्त्वादिकमेव व्यक्तिमाहुः, तच्चिन्त्यम्, व्यज्यते—

a "द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः" इत्यमरः।

टि. b यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि चे"ति विश्वः।

"कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम्"

( किराते १ सर्ग श्लो. )

१. ङ 'शेषे' इति पाठः। २. ख. 'व्याप्त्या' इति पाठः। ३. ङ. 'बहुवचनेन' इति पाठः। ४. क. 'वानरे' इति पाठः। ५. क. ख. ग. घ. ङ. 'बलदेवेन' इति पाठः। ६. घ. दुष्टमित्यारभ्य 'हन्तृत्वात्' इत्येतत्पर्यन्तं पाठो नास्ति।

* प्रायः सर्वासु प्रतिषु 'युक्तम्' इति पाठ आसीत्, परन्तु सम्बन्धशून्यत्वात् तत्स्थाने 'यत्तु' इति कल्पितः पाठो यदि सुधियस्तोषयेत् तर्हि श्रमः सुश्रमः स्यात्, इतरथा परिश्रम एव।

विभक्त्या प्रकटीक्रियतेऽसौ व्यक्तिरितिकर्मव्युत्पत्त्या कृत्स्नस्य नामार्थस्य ग्रहणौचित्यात्, 'पञ्चकं नामार्थ' इति भाष्यसिद्धान्तात् । प्रसिद्धसान्निध्यं यथा — 'भक्तवश्यो हरिर्जयति' अत्र भक्तवश्यपदसान्निध्यात् हरिशब्दस्य विष्णौ शक्तिर्नियम्यते ।

एवं 'हेमखर्जूरयोर्दाता' इत्यत्र हेमपदसान्निध्येन[1] खर्जूरशब्दस्य[a] रजते शक्तिर्नियम्यते । अत एव शक्तिग्राहकबलादप्रसिद्धोऽपि खर्जूरशब्दः क्वचित् प्रयुज्यत इति न दोषः । आर्हन्ती यथा-'गुरुरेव[b] परं ब्रह्म' इति। अत्रौचित्याद् गुरुशब्दस्य ज्ञानदातरि शक्तिर्नियम्यते । एवं 'जीवो[c] जल्पति जीविका' इत्यत्र योग्यतया जीवशब्दस्य बृहस्पतौ शक्तिर्नियम्यते, तस्यैव ग्राह्यवचनत्वात् । समर्थता यथा-'सुरभिः[d] पिकमादकः' । अत्र कोकिलमदोत्पादन[e] सामर्थ्येन सुरभिशब्दस्य वसन्ते शक्तिर्नियम्यते । एवं 'राजा[f] ग्रामधनप्रद' इत्यत्र वितरणसामर्थ्येन[g] 'राजन्' शब्दस्य नृपे शक्तिर्नियम्यते ।

---

टि. a "रूप्यं श्रीः कलधौततारजतं श्वेतानि दुर्वर्णकम् ।
खर्जूरं च हिमांशुहंसकुमुदाभिख्यं सुवर्णं पुनः" इति हैमः ।

b "गुरुर्गीष्पतिपित्राद्योः" ।

c "अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्म पुण्ड्रकम् ।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविकाः ॥
( नैषध० १७ सर्गः, ३६ श्लो० ) कलिवाक्यम् ।

d "वसन्ते पुष्पसमयः, सुरभिः" इत्यमरः । सुष्ठु रभन्ते—रभसयुक्ता भवन्त्यत्र इति सुरभिः ।
"सुरभिर्हेम्नि चम्पके जातीफले मातृभेदे ।
रम्ये चैव वसन्तयोः सुगन्धौ विशल्लक्याम्" इति हैमः ।

e "वनप्रियः परभृतस्ताम्राक्षः कोकिलः पिकः" इत्यमरः ।

f "राजा, प्रभौ, नृपे, चन्द्रे यक्षे क्षत्रियशक्रयोः" इति विश्वः ।

g वितरणं दानम् ।

---

१. क. ध. 'सान्निध्यात्' इति पाठः ।

देशो यथा—'वैकुण्ठे हरिर्जयति' अत्र वैकुण्ठरूपदेशेन हरिशब्दस्य विष्णौ शक्तिर्नियम्यते ।

एवं 'शम्याप्रासाश्रमे कृष्णम्' इत्यत्र शम्याप्रासरूपदेशेन कृष्णशब्दस्य वेदव्यासे शक्तिर्नियम्यते ।

कालो यथा—'दिवा-विभावसुर्भाति' अत्र दिवसरूपकालेन[१] विभावसुशब्दस्य सूर्ये शक्तिर्नियम्यते । रात्राविति पाठेन* वह्नाविति ।

चेष्टा यथा—'इयं गौर्ममेति दर्शयति' । अत्र हस्तचेष्टया[a] सर्वनामबोधितया गोशब्दस्य धेनौ शक्तिर्नियम्यते । 'अयम्' इति पाठे गोशब्दस्य[२] वृषभे शक्तिर्नियम्यते ।

साहचर्यं यथा—'पार्थकृष्णौ रथे स्थितौ' अत्र कृष्णशब्दस्य[३] साहचर्यात् पार्थशब्दस्य जिष्णौ शक्तिर्निम्यते । एवं पार्थसाहचर्यात् कृष्णशब्दस्य विष्णौ शक्तिर्नियम्यते[४] ।

विरुद्धता[५] यथा—'रामोऽर्जुनकुलान्तकः' अत्र विरुद्धतया रामशब्दस्य भार्गवे शक्तिर्नियम्यते । तत† एवार्जुनशब्दस्य कार्तवीर्ये[६] ।

संयुक्तत्वं यथा—'जयिनौ हरिराघवौ' अत्र हरिशब्दस्य

टि. a सर्वादिपठितशब्दबोधितया ।

१. घ. 'शब्देन' इति पाठः । २. क. ख. 'गोशब्दस्य शक्तिर्नियम्यते' इति पाठो नास्ति । ३. क. ग. घ. ङ. 'कृष्णसाहचर्यात्' इति पाठः । ४. क. ग. घ. 'शक्तिर्नियम्यत' इति नास्ति । ५. ङ. 'विरुद्धम्' इति पाठः । ६. ग. 'कार्त्तवीर्ये' इत्यनन्तरं 'शक्तिर्नियम्यते' इत्यधिकः पाठः ।

टि. * अत्र 'शक्तिर्नियम्यते' इत्यस्य शेषो बोध्यः ।

† तत एव—भार्गवसाहचर्यादेवेत्यर्थः ।

राघवसंयुक्तत्वेन सुग्रीवाख्यकीशे[१] शक्तिर्नियम्यते। ततश्च* राघवशब्दस्य रामे।

वियुक्तत्वं यथा—'रामः सीतां स्मरन् दूनः[२]' अत्र रामशब्दस्य सीतावियुक्तत्वेन राघवे शक्तिर्नियम्यते। सीतायाश्च जानक्याम्[३]।

स्वरो यथा—'सुधाकरसुहृद् वक्त्रं[a] दृष्टिः पङ्कजवैरिणी'[b] अत्र पदद्वये तत्पुरुषोच्चारेण[४] वक्त्रे दृष्टौ च प्राधान्येन शक्तिर्नियम्यते। बहुव्रीहिस्वरपाठे तु सुधाकरपङ्कजयोः प्राधान्येनेति। वस्तुतस्तु[५] काव्यमार्गे स्वरो न गण्यते। 'स्वरसंस्कारयोश्छन्दसि' नियम इति प्रातिशाख्यवचनात्। एषामनेकेषां मेलने दानाधिक्ये, फलाधिक्यमितिन्यायेन[६] सौकर्यातिशयः। किञ्चैवं त्रिविधानामपि शब्दानां प्रयोगे संकेतरूढिविभिन्ना प्रयोगरूढिरस्ति। सा च सम्प्रदायरूढिः, कविरूढिः, व्यवहाररूढिश्चेति। तदभावे[c] हि तद्वाचकशब्दप्रयोगो[७] नास्ति। यथा 'न हि[†] वचिरन्तिपरः प्रयुज्यते' 'गत्यर्थौ हन्तिश्चे'ति। अत एव नैषधे—

टि. a सुधाकरः सुहृद् यस्य तत् सुधाकरसुहृत्।
b पङ्कजं वैरि यस्याः सा पङ्कजवैरिणी।
c तदभावे—प्रयोगरूढ्याभावे।

१. ङ 'सुग्रीवाख्ये' इति पाठः। २. घ. 'हतः' इति पाठः। ३. घ. ङ. 'जानक्यामिति' इति पाठः। ४. ग. 'तत्पुरुषे स्वरोच्चारेण' इति, घ. 'तत्पुरुषस्वरोच्चारेण' इति च पाठः। ५. ङ 'तु' नास्ति। ६. ग. घ. ङ. 'दानाधिक्यात्' इति पाठः। ७. 'तद्वाचकशब्दो न भवति' इति पाठः।

टि. * ततश्च—सुग्रीवसंयोगाच्चेत्यर्थः।
† वचधातुः प्रथमपुरुषबहुवचन एव न प्रयुज्यत इति केचित्। बहुवचनमात्र एव न प्रयुज्यत इत्यपरे।

* भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः ।
शशो यदस्यास्ति शशी ततोऽयमेवं मृगोऽस्यास्ति मृगीति नोक्तः ॥
( २२ सर्ग०, ८४ श्लोक )

१मत्कृतेऽद्वैतविवेके च—

मृगाङ्कत्वेऽपि न मृगी शशाङ्कत्वाच्छशीति तु ।
चन्द्रमाः कथितस्तत्र रूढेरन्यन्न कारणम् ॥ इति ।

अस्या रूढेर्दर्पभञ्जने प्रसिद्धार्थपदसन्निधिरूपं शक्तिग्राहकं शक्तिनियामकं च समर्थभावं भजतः यथा—

यस्य वेश्मनि[a] खर्जूरं पुष्कलं विद्यतेऽत्र सः ।
किमर्थं दीनवदनो याचेदन्यं धनोन्मदम् ॥

टि. a अत्र रूप्यवाचकखर्जूरशब्दः
"रूप्यं श्रीकलधौततारररजतं श्वेतानि दुर्वर्णकं ।
खर्जूरश्च हिमांशुहंसकुमुदाभिख्यं सुवर्णं पुनः ॥"
इति हैमकोशे पठितोऽप्यसहायत्वान्न रजतबोधनसमर्थः किन्तु पेशीभ्रान्तिजनकतयाऽपुष्टार्थदोषकरः ।

१. क. 'मत्कृते' इति नास्ति ।

टि. * अन्वयः—एष लोकः पदप्रयोगाध्वनि व्याकरणस्य दर्पं भङ्क्तुं प्रभुः। यत् शशः अस्य अस्ति, ततः अयं शशी, एवं मृगः अस्य अस्ति इति मृगी न उक्तः ।

चन्द्रे यथा वैचित्र्यं तथा चन्द्रवाचकपदेऽपि वैचित्र्यमस्तीति सूचयितुमाह भङ्क्तुमिति । एष—मादृशः, लोकः—कविजनः, पदप्रयोगाध्वनि—सुप्तिङन्तशब्दोल्लेखपद्धतौ, व्याकरणस्य शब्दानुशासनस्य, दर्पं—मत्कृतनियमाधीन एव समस्तशब्दप्रयोग इति गर्वम्, भङ्क्तुं—दूरीकर्तुम्, प्रभुः—समर्थः, यत्—यस्मात्, शशः अस्य अस्ति ततो हेतोः अयं चन्द्रः शशी इति उक्त इति शेषः । एवम्—अनेन प्रकारेण, मृगः अस्य अस्ति इत्यर्थे मृगी इति नोक्तः, मादृशकविलोकेनेति शेषः । अत एव 'अत इनठनौ' इति व्याकरणानुसाराद् यथा शशपदादिनि शशीति पदप्रयोगः क्रियते तथैव मृगपदादिनः प्रसक्तावपि मृगीति पदप्रयोगो न क्रियते, कृत्तद्धितसमासप्रयोगेषु व्याकरणमननुसृत्य अभिधानस्यैवानुसरणादिति चन्द्रवाचकपदेऽपि वैचित्र्यमस्तीति भावः । अत्र पूर्वार्द्धं प्रति परार्द्धवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः ।

अत्र रजतवाचकखर्जूरशब्दः प्रयोगरूढयभावाद्दोषत्वेनाभिमतः ।

यस्य गेहे हिरण्यं च खर्जूरश्च कृताकृतम् ।
स कथं दीनवदनो याचेदन्यं[1] धनोन्मदम् ॥

इति पाठान्तरकल्पने हिरण्यपदसन्निधिः कृताकृतपदसन्निधिश्च खर्जूरशब्दस्य रजतवाचकत्वबोधनसमर्थाविति तद्बलेन दोषोद्धारः सुकरः । क्वचित्तु पदान्तरसन्निधिबलेन शब्दप्रयोगाभावेऽपि तच्छक्तिरर्थं[2] बोधयति । तथा 'हे राम[3] पाहि' इत्यत्र सम्बोधनमध्यमपुरुषबलेन[4] युष्मच्छब्दोऽध्याह्रियते ।

अत्र "युष्मद्युपपदे" ( पा० सू० १।४।१०५ ) इत्यादि सूत्रं प्रमाणम् । अत एवाह वामनः *"विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ सागराम्बरादिवत्" ( अधि० ५, अध्या० १, सू० १० ) इति । अस्मादेव ज्ञापकाद् द्विविधोप्यध्याहारः समूलः ।

श्री ( मद् ) [5] आशा[6]धरविर[7]चितायां त्रिवेणिकायां
प्रथमं शक्तिविवेचनाप्रकरणं समाप्तम् ।

---

१. ख. 'याचेदन्यं धनोन्मदम्' इति नास्ति । २. घ. 'अर्थान्तरम्' इति पाठः । ३. घ. 'हे राम मां पाहि' इति पाठः । ४. क. ग. घ. ङ. सम्बोधनमध्यमपुरुषसन्निधिबलेन इति पाठः । ५. क. 'इति शक्तिप्रकरणम्' इति पाठः । अग्रेतनश्च पाठो नास्ति । ६. घ, ङ, आशाधरभट्टविरचितायाम्, इति पाठः । ७. ग. घ. 'कृतायाम्' इति पाठः । ख. 'इति शक्तिप्रकरणं समाप्तम्' इति पाठः । घ. 'समाप्तिमगमत्' इति पाठः ।

---

टि. * विशेष्यस्य प्रतिपत्तौ जातायां विशेषणमात्रस्यैव प्रयोगः । यथा "निधानगर्भामिव सागराम्बराम्" अत्र हि पृथिव्या विशेषणमात्रमेव प्रयुक्तम् ।

# अथ लक्षणा[1] प्रकरणम्

[a]शक्यसम्बन्धसहकारिणी *वृत्तिर्लक्षणा । सा च शब्दव्यापारत्वाच्छब्दनिष्ठा मुख्यार्थबाधे सति तत्संबन्धिनमर्थं विषयीकरोति । [2]सम्बन्धश्च मुख्यार्थे प्राधान्येन वर्त्तमानोऽपि लक्ष्यार्थमाश्रयति । शक्यसम्बन्धो यद्यपि शब्देऽपि[3] प्रवर्त्तते तथापि लक्षणायामप्रयोजकः ।

सा त्रिविधा—जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा च[4] । यत्सत्त्वे शब्दः शक्यार्थं जहाति सा जहल्लक्षणा । न जहाति चेदजहल्लक्षणा । तदुभययुक्ता जहदजहल्लक्षणा ।

त्रिविधापि पुनर्द्विविधा—निरूढा, फलवती च । शक्तिवत् कोशादिप्रसिद्धा निरूढा । इयञ्च मुख्यार्थबाधे प्रवर्तत इति शक्तितो विशेषः । एषा अनादिलक्षणेत्याहुः[5] ।

[b]फलवती [6]च व्यङ्ग्यार्थप्रतीतये[7] प्रवर्तिता । सा चाधुनिकलक्षणेत्याहुः । अस्याः फलन्तु व्यङ्ग्यार्थप्रतीतिः । तत् क्वचिद्

---

टी. a शक्यसम्बन्धो लक्षणेति तार्किकाः । शक्यसम्बन्धेनाशक्यार्थप्रतिपादकत्वं ( दिका ) लक्षणेत्यालङ्कारिकाः । मुख्यार्थबाधमन्तरेणापि लक्षणा युक्ता । यथाऽऽहुरालङ्कारिकाः—

"मुख्यार्थ बाधाभावेऽपि तात्पर्यानुपपत्तितः ।
यष्टीः प्रवेशयेत्यादौ लक्षणाऽङ्गीकृताऽखिलैः" ।। इति ।

टि. b फलवती-प्रयोजनवती ।

---

१. क. ख. 'अथ लक्षणाप्रकरणम्' नास्ति । २. क. ख. 'च' नास्ति । ३. क. घ. 'अपि' नास्ति । ४. घ. ङ 'चेति' पाठः । ५. ङ 'इत्युच्यते' इति पाठः । ६. ग. घ. ङ. 'तु' इति पाठः । ७. ग. 'प्रतिपत्तये' इति पाठः ।

---

टि. * शाब्दबोधौपयिकः सम्बन्धो वृत्तिः ।

गूढं, क्वचिदगूढं चेति द्विविधम् । गूढं [a]सहृदयमात्रवेद्यम् । अगूढं तु सर्वजनवेद्यम् ।

पुनरपि लक्षणा द्विविधा—व्यधिकरणविषया, समानाधिकरणविषया चेति । यत्र व्यधिकरणपदं तात्पर्यग्राहकं सा व्यधिकरणविषया । यत्र च समानाधिकरणपदं तात्पर्यग्राहकं सा समानाधिकरणविषया । मुख्यार्थबाधकं तात्पर्यग्राहकं तदेव लक्षणाग्राहकमित्युच्यते ।

पुनरपि गौणी, शुद्धा चेत्येषा द्विविधा । सादृश्यसम्बन्धे सति[1] गौणी । तद्भिन्नसम्बन्धे च शुद्धा । सम्बन्धश्चानेकविध इति सम्प्रदायः ।

क्रमेणोदाहरणानि—'गङ्गायां[2] घोषः' अत्र गङ्गाशब्देन तत्तीरे [b]व्यधिकरणविषया फलवती जहल्लक्षणा, घोषपदं तात्पर्यग्राहकं, शैत्यपावनत्वादिप्रतीतिः फलम् । [c]केचित्तु तीरं सामीपिक आधारः सप्तम्यर्थ इत्याहुः ।

एवं 'द्वैतवने युधिष्ठिरं समाययौ' इत्यत्र सरोविशेषवाचिना द्वैतवनशब्देन तत्तीरे [d]व्यधिकरणविषया फलवती जहल्लक्षणा । युधिष्ठिरसमागमस्तात्पर्यग्राहकः । फलं तु विविक्तताप्रतीतिः ।

---

मू. टी. a काव्यवासनया परिपक्वबुद्धयः सहृदयाः ।

b यथा भागवते "बदरीत्वं प्रयाहि" इति श्रीकृष्णवाक्ये बदरीशब्दः कलापग्रामादिलक्षकः ।

c केचित्तु वैयाकरणाः ।

d भिन्नविभक्तिकत्वे सति भिन्नार्थनिष्ठत्वं व्यधिकरणविषयत्वम् । एकविभक्तिकत्वे सति एकार्थनिष्ठत्वं समानाधिकरणत्वम् ।

---

१. क. 'सति' नास्ति । २. क. अथ फलवती जहल्लक्षणा, गङ्गायां घोषः' इति पाठः ।

अत्र[१] 'द्वैतवनं सरः' [२]भारतोक्तेः। केचित्त्वत्र द्वैतवने निरूढलक्षणेत्याहुः। तथोक्तं भारते।

येन[a] लिङ्गेन यो देशो युक्तः समभिलक्ष्यते।
तेनैव नाम्ना तं देशं वाच्यमाहुर्मनीषिणः॥ इति।

निरूढलक्षणायाः शक्तितुल्यत्वाद् *वाच्यमित्युक्तम्। काव्यप्रदीपे—

"यन्नाम्ना यत्र [b]चैत्यादिर्विषयोऽपि स तादृशः" इति।

'छत्रिणो[३] यान्ति' अत्र छत्रधारिवाचिना छत्रिशब्देन तत्सहचरेषु अच्छत्रिष्वपि व्यधिकरणविषया[४] फलवती अजहल्लक्षणा। बहुत्वं[५] तात्पर्यग्राहकम्। फलं तु छत्रिबाहुल्यप्रतीतिः।

'काकेभ्यो दधि रक्ष्यताम्' अत्र काकशब्देन दध्युपघातमात्रे[६] फलवती अजहल्लक्षणा। फलं तु काकदुष्टताप्रतीतिः। 'राजा गच्छति' अत्र [७]राजन्शब्देन गजतुरगादिष्वपि फलवती अजहल्लक्षणा। फलं तु राजप्रसिद्धिप्रतीतिः। 'धनुर्भृतः संयति लब्धकीर्त्तयः' अत्र 'धनुष्शब्देन आयुधसामान्ये फलवती अजहल्लक्षणा। एवं ब्राह्मणग्रामादिष्वपि द्रष्टव्यम्।

अथ फलवती जहदजहल्लक्षणा। इयं भागत्यागलक्षणेत्युच्यते। 'पशूननक्ति अत्र पशुशब्देन तन्नेत्रेषु फलवती जहदज-

---

a लिङ्गेन—ज्ञापकेन। b रथ्यादिः।

---

१. क, ख, ग, 'यत्र' इति पाठः। २. ख. घ. 'इति भारते' इति पाठः। ३. क. 'अथ फलवती अजहल्लक्षणा—छत्रिणो यान्ति' इति पाठः। घ. 'छत्रिणो यान्तीत्यत्र, इति पाठः। ४. ख. 'समानाधिकरणविषया' इति पाठः। ग. 'व्यधिकरणविषया' इति नास्ति'। ५. घ. 'बहुत्वं तात्पर्यग्राहकम्' इति नास्ति। ६. क, ग, घ, 'दध्युपघातकमात्रे' इति पाठः। ७. क. 'राजशब्देन' इति पाठः।

---

टी. * भारतोक्तश्लोक इतिशेषः।

हल्लक्षणा । फलं तु [१]सकलतदात्मसंस्कारप्रतीतिः । एवं 'व्रीहीन् प्रोक्षति' इत्यादावपि ज्ञेयम् । 'कर्णावतंसः' अत्र कर्णाभरणवाचिनाऽवतंसशब्देन[a] भूषणमात्रे फलवती भागत्यागलक्षणा । फलं तु तत्र स्थितत्वप्रतीतिः । 'वंश [b]करीरनीलैः' अत्र वंशाङ्कुरवाचिना करीरशब्देनाङ्कुरमात्रं लक्ष्यते । फलं तु चारुत्वप्रतीतिः । "हिमांशुवंशस्य करीरमेव माम्" [२]इत्यत्र नलवाक्येऽपि तथैव ।

[c]'करिकलभः' अत्र हस्तिबालकवाचिना कलभशब्देन बालकमात्रं लक्ष्यते । तत्फलं तु प्रौढिप्रतीतिः । अत एव 'एकार्थं पदमप्रयोज्यम्' इत्युक्त्वा 'करिकलभकर्णावतंसादिषु प्रतिपत्तिविशेषकरेषु न दोषः' इत्याह वामनः । केचित्तु कलभादिपदे [३]लक्षणा नास्तीत्याहुः,[४] विशिष्टवाचकत्वाभावात् । 'कलभः करिपोतः[५] स्यात्' इत्यादि कोशे [६]कर्यादिसम्बन्धाभिधानं प्रयोगरूढिप्रदर्शनार्थमिति । तेन 'भ्रमरकलभौ कर्णयुगलम्' इति शङ्करस्वामिप्रयोगे लक्षणा न स्यात् । वस्तुतस्तु प्रयोगरूढिर्लोकसिद्धेति कोशादौ तन्निर्देशोऽनावश्यकः । तेन यथोक्तमेव साधु । [d]'स कीचकैः' इति—अत्र कीचकशब्देन वेणुमात्रे फलवती भागत्यागलक्षणा । फलं तु चारुशब्दोत्पत्तिप्रतीतिः । अन्यथा वेणुमेव ब्रूयात् । अत एव वामनः—"विशिष्टवाचकानां पदानां विशेषणवि-

मू. टी. a 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे' इति मेदिनी ।
b 'वंशाङ्कुरे करीरोऽस्त्री' इत्यमरः ।
c 'नहि नाहि करिकलभोऽसौ' इति कुवलयानन्दसंग्रहः ।
d 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः ।

१. इ. 'तादात्म्य' इति पाठः । २. ग. 'इति नलवाक्यमित्यत्रापि । घ. 'इत्यत्रापि' इति पाठः । ३. ङ. 'कलभादिपदेषु' इतिपाठः । ४. ग. घ. 'नास्ति' इति पाठः । ५. ग. घ. 'करिपोते' इतिपाठः । ६. ग. 'कार्यादि' इति पाठः । घ. 'कार्य' इति पाठः ।

शेष्यान्यतरसमवधाने सति विशेष्यविशेषणान्यतरमात्रपरता ग्राह्या" इति ।

'पुंस्कोकिलो यन्मधुरं [१]चुकूज' [ कुमार सम्भव ३ सर्ग, ३२ श्लोक ] 'पुङ्गव' इत्यादिष्वपि इयमेव लक्षणा[२] । 'शिखी ध्वस्तः' 'दण्डी नास्ति' इत्यादिषु विशेषणमात्र इयमेव लक्षणा । तथा च वामनः—"सविशेषणे हि विधिनिषेधौ सति विशेषणे बाधे विशेष्यमुपसंक्रामतः । सति विशेष्ये बाधे विशेषणमुपसंक्रामतः"[३] इति । 'वंशांकुरश्चारुरस्ति' [४] इत्यादि—अत्र विशेष्यमात्रे इयमेव लक्षणा ।

अथागूढफलाऽजहल्लक्षणा[५] —यद्यप्यगूढफला नावश्यं वक्तव्या तथापि प्राचीनानुसारेणोच्यते,—'गडुद्वयमिदं पीडयिष्यति, किं तदेवाग्रे कथयिष्यति' अत्र कथनशब्देन बोधनमात्रेऽगूढफलाऽजहल्लक्षणा[६] । फलं तु सुखयिष्यतीति प्रतीतिः । 'वसन्तस्तरून्नर्तयति' अत्र वसन्तशब्देन तद्वर्त्तिनि मारुतेऽगूढफलाऽजहल्लक्षणा । फलं तु मन्दगतया तरुचारुतापादकत्वप्रतीतिः । 'फलिता[७] रम्भा जनानाह्वयति,[८] अत्र रम्भाशब्देन तच्छिरोभागेऽगूढफला जहदजहल्लक्षणा । फलं तु फलस्वादुताप्रतीतिः, भूरित्वप्रतीतिश्च । काव्यप्रकाशे भागत्यागलक्षणा नास्ति जहल्लक्षणायामन्तर्भावात् ।

अथ समानाधिकरणविषया[९] सारोपा साध्यवसाना च । कार्यकारणभावादौ शुद्धा जहल्लक्षणा—यथा 'आयुर्घृतम्' आयुरे-

---

१. क. ख. ग. घ. ङ. 'यन्मधुरं चुकूज' इति पाठो नास्ति । २. ग. घ. 'लक्षणा द्रष्टव्या' इति पाठः । ३. ग, घ, 'इति' नास्ति । ४. घ. 'इत्यादौ' इति पाठः । ५. ख. ग. घ. ङ 'अजहल्लक्षणा' इति पाठो नास्ति । ६. ख. ग. घ. ङ 'अजहल्लक्षणा' इति नास्ति । ७. क. 'अथाऽगूढफला जहदजहल्लक्षणा' इत्यनन्तरं फलितेत्यादि पाठः । ८. ग. 'आह्वयन्ति' इति पाठः । ९. क. 'समानाधिकरणविषया जहल्लक्षणा' इति पाठः ।

वेदम्,[१] अत्र शुद्धा फलवती जहल्लक्षणा। फलं त्वसाधारणकार्यकारित्वप्रतीतिः। एवं तात्स्थ्यात्ताच्छब्द्यम्—'कलिङ्गः साहसिकः' तादर्थ्यात्ताच्छब्द्यम्—'इन्द्रार्था स्थूणा इन्द्रः'। स्वस्वामिभावात्ताच्छब्द्यम्—'राजकीयो पुरुषो राजा'। सादृश्यसम्बन्धे तु गौणी अजहल्लक्षणा। यथा मुखं चन्द्रः, चन्द्र एवायम्। गौर्वाहीकः, गौरेवायम्। अग्निर्माणकः, अग्निरेवायम्। पण्डितोऽयमपरः सूर्यः सूर्य एवायम्। सिंहो देवदत्तः सिंह एवायम्; इत्यादिष्वजहल्लक्षणा, पूर्वार्थापरित्यागेन गुणरूपाधिकार्थग्रहणात्। अवयवावयविभावे च जहदजहल्लक्षणा। यथा 'अग्रसानुषु अग्रहस्तः, हस्ताग्रम्, अग्रपादः, अग्रसेनेत्यादौ। फलं तु[२] महत्त्वप्रतीतिः[३]। निरूढा यथा—[a]'रवौ नीलं बुधे पीतम्' अत्र रविबुधशब्दाभ्यां तद्वारयोर्निरूढा [४]जहदजहल्लक्षणा। 'मातृविद्धो गणेश्वरः' अत्र मातृशब्देन तृतीया गणेशशब्देन चतुर्थी लक्ष्यते। इयश्च पादपूरणार्थत्वात् फलवतीति केचित्। 'यमो[b] न गमने शस्तः' इह यमशब्देन भरणीनक्षत्रं, तत्रापि पक्षद्वयम्। 'हस्तिहस्तः, करिकुम्भः, अत्र हस्तकुम्भशब्दाभ्यां सादृश्यात् शुण्डायां शिरःपिण्डयोश्च निरूढा जहदजहल्लक्षणा।[५]। 'बाणैरश्वैश्च हायनैः' अत्र बाण शब्देन पञ्चसंख्यारूपगुणसादृश्यात् पञ्च-

---

मू. टी. [a]'भानुर्हंसः, सहस्रांशुस्तपनः, सविता रविः, । कर्मसाक्षी, जगच्चक्षुरंशुमाली त्रयीतनु' रित्यमरः।

[b] यमशब्दस्य ज्योतिश्शास्त्रे भरणीनक्षत्रवाचकत्वान्निरूढेति केचित्। अथवा पादपूरणार्थत्वात् फलवतीति पक्षद्वयम्। यमशब्देन तदधिष्ठान्तरितनक्षत्रे ततश्च काले इति परम्परासम्बन्धः।

---

१. ग. घ. 'आयुर्वेदमित्यत्र' इति पाठः। २. ख. 'तु' इति नास्ति। ३. ग. घ. 'महत्त्वादिप्रतीतिः' इति पाठः। ४. क. ग. घ. ङ. 'अजहल्लक्षणा' इति पाठः। ५. क. ग. घ. ङ 'अजहल्लक्षणा' इति पाठः।

हायनानि लक्ष्यन्ते। एवमश्वशब्देन च सप्त। केचित्तु बाणाश्व-शब्दरूपद्रव्याभ्यां पञ्चसप्तसंख्ययोर्लक्षणा। ततश्च हायनेषु लक्षणेत्याहुः।

अन्ये तु बाणशब्देन स्मरबाणेषु लक्षणा ततश्च संख्यायां ततो हायनेषु इत्याहुः। एवमश्वशब्देन सूर्याश्वेषु, शेषं तुल्यम्। अथ[१] निरूढाऽजहल्लक्षणा। 'श्वेतो धावति' अत्र गुणवाचिना श्वेत-शब्देन तदाश्रये हयादौ निरूढाऽजहल्लक्षणा 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' [२]इत्यमरकोशोक्तेः। केचित्तु श्वेतो वर्णोऽ-स्यास्तीति [३] श्वेतः। अस्त्यर्थे मतुप्। 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति तस्य लुकि शक्तिरेवेत्याहुः। 'मञ्चाः क्रोशन्ति' इह मञ्चशब्देन तत्रस्था (बालकाः) लक्ष्यन्ते। अत्र फलविवक्षायां तु 'तात्पर्याद् विशेषावगतिः' इतिन्यायेन फलवत्यपि भवति। एवं 'कुन्ताः प्रविशन्ति' इत्यादावपि ज्ञेयम्। 'द्रोणो व्रीहिः' अत्र द्रोण-रूपमानपात्रेण परिच्छिन्ने व्रीहौ द्रोणशब्दो लाक्षणिकः। वैया-करणास्तु परिमाणं विभक्त्यर्थ इत्याहुः। वस्तुतस्तु सामान्या-कारेण परिमाणं शक्यार्थः, द्रोणरूपविशेषाकारेण लक्ष्यार्थ एव। 'सुरद्विषश्चान्द्रमसी सुधेव' अत्रासुरसामान्यवाचिना [४]सुरद्विष्-शब्देन राहुरूपविशेषो लक्ष्यते 'निर्विशेषं न सामान्यं विशेषो[५] न तदुज्झितः' इति न्यायात् विशेषार्थलक्षणायां सामान्यार्थत्यागो नास्ति। 'तदा निदद्रावुपपल्वलं खगः' (नैष०, १ सर्ग; १२१ श्लोक) अत्र सरोविशेषवाचिना पल्वलशब्देन तत्सामान्यं लक्ष्यते। तत्राप्युक्तन्यायेन न विशेषार्थत्यागः। लक्षणां विना समुद्रतुल्योक्तिर्न स्यात्।

---

१. क. 'अथ निरूढाऽजहल्लक्षणा' इति नास्ति। २. ख. ग. 'इत्यमरको-शादौ' इतिपाठः। ३. ग. घ. 'वर्णोऽस्यास्ति' इति पाठः। ४. क. ग. घ. ङ. 'सुरद्विड्शब्देन' इति पाठः।

अथ निरूढा जहदजहल्लक्षणा—'गृहं संमार्ष्टि' अत्र गृहशब्देन तदेकदेशे निरूढा जहदजहल्लक्षणा। एवं 'कुसुमितद्रुमम्' इत्यादौ। 'सोऽयं देवदत्तः' अत्र पूर्वकालोत्तरकालवर्त्तित्वपरित्यागेन देवदत्तमात्रं लक्ष्यते। एवं 'शिवोऽहं, सोऽहं, तत्त्वमसि'-इत्यादावपि । (अत्र) [१]शिवो—विद्योपाधिः, अहम्—अविद्योपाधिः, उपाधिद्वयपरित्यागेन चैतन्यमात्रं लक्ष्यते। स—परोक्षवृत्तिः, अयं—प्रत्यक्षवृत्तिः, परोक्षवृत्तित्वप्रत्यक्षवृत्तित्वपरित्यागेन चैतन्यमात्रं लक्ष्यते । तत्—निर्गुणचैतन्यं त्वं—सगुणचैतन्यं, तयोः परित्यागेन चैतन्यमात्रं लक्ष्यते ।

अथ [२]लक्षणाप्रयोजकः सम्बन्धो निरूप्यते। स [३]च त्रिविधः संयोगः, समवायो, विशिष्टबुद्धियोग्यश्च । *'सम्बद्धबुद्धिजनकः सम्बन्धः' इति [४]लक्षणम्। तत्र द्रव्ययोरेव [५]संयुक्तत्वबुद्धिहेतुः संयोगो गुणविशेषः। स नानाविधः। 'आत्मानमलङ्करोति' [६]अत्रात्मशब्देन [७]तत्संयोगि शरीरं लक्ष्यते । व्याप्यव्यापकभावः [८]सम्बन्धोऽयम् ।

'वटे गावः सुशेरते' अत्र वटशब्देन तत्संयोगि भूतलं लक्ष्यते। [९]अत्र सामीप्यं सम्बन्धः। केचित्तु सामीप्यं सप्तम्यर्थ इत्याहु। 'घण्टापथः' अत्र [१०]घण्टाशब्देन तदुपलक्षिता गजा

१. क. ख. घ. ङ 'शिवो विद्योपाधिः' इत्यारभ्य 'चैतन्यमात्रं लक्ष्यते' इत्येतत्पर्यन्तं नास्ति । २. क. ङ. 'लक्ष्यप्रयोजकः' इति पाठः। ३. ख. ग. घ. ङ. 'च' इति नास्ति। ४. ख. ग. घ. ङ 'तल्लक्षणम्' इति पाठः। ५. ग. घ. 'संयुक्तबुद्धिः' इति पाठः। ६. क. 'आत्मन् शब्देन' इति पाठः। ७. घ. 'तत्संयोगात्' इति पाठः। ८. ग. घ. 'संयोगोऽयम्' इति पाठः। ९. ग. घ. 'तत्र' इति पाठः। १०. ग. 'घण्टापथशब्देन' इति पाठः।

टी. * सम्बद्धबुद्धिश्च—'इदमेतेन सम्बद्धमि'त्याकारिका।

लक्ष्यन्ते। [1]अत्र [2]धार्यधारकभावः सम्बन्धः। 'गणकी' 'लेखकी' अत्र गणकलेखकशब्दाभ्यां तत्पत्न्यौ लक्ष्येते। भर्तृभार्यात्वं च सम्बन्धः। "पुंयोगादाख्यायाम्" (पा० सू० ४।१।४८) इति ङीप्। स्त्रीपुंसयोर्भिन्नस्थानावस्थानेऽपि विवाहकाले हस्तयोजन-जन्मा संयोगो यावज्जीवं न निवर्तते। भर्तृभार्यात्वेन 'इमौ संयुक्तौ' इति धीजनकत्वात्, यज्ञादौ सहाधिकाराच्च।

'सैन्यसुग्रीववाहनः' अत्रोपलक्षणेन मेघपुष्पबलाहकावपि गृह्येते। तदग्रिमश्लोके 'ते हया वासुदेवस्य' इति बहुत्वश्रवणात्। साहचर्यंश्च सम्बन्धः। 'श्यालः स्वस्रोरथाग्रहीत्' स्वसा च स्वसा च स्वसारौ, तयोः। अत्र द्वितीयस्वसृशब्देन [a]तत्पतिर्लक्ष्यते। यज्ञादिषु साहचर्यात्। एवं 'प्रथमयोः पूर्वसवर्णः' (पा० सू० ६।१।१०२) [3]अत्रापरेण प्रथमाशब्देन [b]द्वितीया लक्ष्यते, साह-चर्यात्, शब्दस्य द्रव्यत्वाच्च। 'गरुडेन निषादग्रामो भक्षितः' अत्र ग्रामशब्देन [4]तद्वासिनो जना लक्ष्यन्ते। आधाराधेयभावश्च सम्बन्धः। 'सेतुबन्धे नरः स्नात्वा' अत्र सेतुबन्धशब्देन तदाधारः समुद्रो लक्ष्यते। आधाराधेयभावः सामीप्यं वा सम्बन्धः। एव-मन्यत्राप्यूह्यम्।

नित्यसम्बन्धः समवायः। स पञ्चविधः—अवयवा-वयविभावः, गुणगुणिभावः क्रियाक्रियावद्भावः, जातिव्यक्तिभावः, विशेषनित्यद्रव्यभावश्चेति। क्रमेणोदाहरणानि— [5]'शाखामृगो

मू. टि. a आनन्तर्येणेति शेषः। b आनन्तर्येणेति शेषः।

१. घ. 'अत्र' इति नास्ति। २. क. धार्यधारकभावसम्बन्धः। ग. 'धार्य धारकभावश्च सम्बन्धः'। घ. धार्यधारकभावश्चात्र सम्बन्धः' इति पाठः। ३. ख. घ. अपरेण' इति नास्ति। ४. ग. 'ग्रामवासिनः' इति पाठः। ५. ग. घ. 'यथा शाखामृगः' इति पाठः।

वनमृगः’ इह शाखाशब्देन तरुर्लक्ष्यते, अवयवावयविभावसम्बन्धात् । वनशब्देनापि तथैव । न हि वानरस्य केवलायां शाखायां सकले वने वा नियतः सञ्चारो, वृक्षे तु नियत इति । ‘सैन्यानि सोमान्वयमन्वयुस्तं न [1]ते मनोरन्वयमन्वमन्यत’ इह वंशवाचिनाऽन्वयशब्देन तदेकावयवो लक्ष्यते । एवं ‘रघूणामन्वयं वक्ष्ये’ ‘निरुध्यमाना यदुभिः कथञ्चित्’ [2]अत्र रघुयदुशब्दाभ्यां तदवयवा लक्ष्यन्ते । ‘सन्तानो हि शरीरावयवः’ इति धर्मशास्त्रे । ‘और्वः पृथ्वी’ अत्रौर्वशब्देन पुत्रत्वेन स्वीकृतो वडवाग्निर्लक्ष्यते । पृथ्वीति पृथुना पुत्रीत्वेन स्वीकृता भूमिश्च लक्ष्यते । ‘पुंयोगादाख्यायाम्’ इति ङीप् । ‘देवक्या सूर्यया सार्द्धम्’ अत्राप्युक्तसूत्रेण ङीप् । देवकपुत्रीत्वात् सूर्येति तदभिधानं, न तु सूर्याशब्दो नवोढ़ावाचकः । एवं ‘कुन्तीशब्दोऽपि कुन्तीभोजपुत्रीत्वात्’ इत्यादि स्वयमूह्यम् । गुणगुणिभावो यथा—‘सुरभिषु फलेषु मानसम्’ अत्र सुगन्धगुणवाचिना सुरभिशब्देन तदाश्रयीभूतफलानि लक्ष्यन्ते । गुणगुणिभावोऽत्र सम्बन्धः । ‘शिशिरेऽपि पयसि’ अत्र तु न लक्षणा । ‘शीतं गुणे तद्वदर्थाः सुशीमः शिशिरो जड़ः । तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः, इत्यमरसिंहेन शिशिरशब्दस्य द्रव्यवाचित्वाभिधानात् । [3]‘शर्करामास्वादयति’ अत्र शर्कराशब्देन तद्गतमाधुर्यगुणो, लक्ष्यते, गुणगुणिभावश्च सम्बन्धः । क्रियाक्रियावद्भावो यथा—‘पश्य मृगो धावति’ इति ( इत्यत्र ) क्रियापदेन क्रियाविशिष्टो मृगो लक्ष्यते । ‘क्रिया नामेयमत्यान्तापरदृष्टा’ इति भाष्यकारोक्त्या तद्दर्शनासम्भवात् । क्रियाक्रियावद्भावश्च सम्बन्धः । एवं ‘नृत्यं पश्यति

१. ग. घ. ‘तं’ इति पाठः । २. ख. ग. घ. ङ. ‘अत्र’ इति नास्ति ।
३. क. ‘कः शर्करामास्वादयति’ इति पाठः ।

वेश्यायाः' इत्यादावपि । 'भेर्यः श्रूयन्ते' अत्र भेरीशब्देन तद्गर्जितं लक्ष्यते । सम्बन्धस्तु स एव । भेर्याकाशस्य गुणित्वं शब्दस्य च गुणत्वमिति गुणगुणिभावः [१]सम्बन्ध इति केचित् । 'पुष्पं जिघ्रति' तद्गन्धं गृह्णातीत्यर्थः, पुष्पस्य पृथिवीमयत्वात् तद्गन्धेन सह गुणगुणिभावः । 'तद्गन्धं जिघ्रती'त्यत्र न लक्षणा । क्रियापदे तु भागत्यागलक्षणा, उपादानमात्रार्थत्वात् । जातिव्यक्तिभावो यथा—'क्षत्रजातिरुदियाय भुजाभ्याम्' अत्र क्षत्रजातिशब्देन तदाश्रयीभूता व्यक्तयो लक्ष्यन्ते । जातिव्यक्तिभावश्च सम्बन्धः । 'न जातु ब्राह्मणं हन्यात्' अत्र व्यक्तिपरेण ब्राह्मणशब्देन तत्समवेता जातिर्लक्ष्यते । अन्यथा सर्वेषां ब्राह्मणानामवध्यत्वं न स्यात् । सम्बन्धस्तूक्त एव । सामान्यविशेषभावोऽप्येवमेव । केचित्तु बहुव्यापकं सामान्यम्, अल्पव्यापको विशेष इति लक्षयित्वा तदतिरिक्तमपि सामान्यविशेषभावमाहुः । [२]'जनेन यूनः स्तुवता' अत्र यून इत्यनेन यौवनविशिष्टा राजानो लक्ष्यन्ते । 'निदर्शनं नैषधम् इति [३]नलं प्रति निर्देशात् । 'अदेवमातृकाः कुरवः' अत्रादेवमातृकशब्देन नदीमातृका लक्ष्यन्ते । अन्यथा देवरूपमातृरहिता इत्यर्थः स्यात् । सामान्यविशेषभावश्च सम्बन्धः । ततो देवमातृकभिन्नाः कूपादिमातृका अपि देशा भवन्ति । एवम् 'असितयामिनीषु' 'अनीलवाजिनम्' इत्यादावपि द्रष्टव्यम् । विशेषनित्यद्रव्यभावो यथा—'स एव कालेन दुरत्ययेन ते' अत्र कालेनेति भावप्रधाननिर्देशः, तेन नित्यद्रव्यस्य [४]कालस्य कालत्वे विशेषेणोक्तः सम्बन्ध इति तार्किकाः । यद्वशात् 'अयमनेन विशिष्ट' इति बुद्धिरुत्पद्यते, स विशिष्टबुद्धिजनकः । स नाना-

१. ख. ग. 'सम्बन्ध इति केचित्' इति नास्ति । २. ग. 'यथा 'जनेन' इति पाठः । ३. ग. नलप्रतिनिर्देशात्' इति पाठः । ४. ख. घ. 'कालस्य' इति नास्ति ।

विधः। तत्र जन्यजनकभावो यथा—'विधिहेतुरहेतुरागसाम्' अत्रागः-शब्देन तज्जन्यं दुर्यशो लक्ष्यते। तेन दुर्यशसामहेतुरर्थः सिद्ध इति। एवं 'मुनिभिः स्मृतः' अत्र स्मृतशब्देन तज्जन्ये कथने लक्षणा। 'मुनयो विदुः' अत्र विदुरित्यनेन तत्कृता ग्रन्था लक्ष्यन्ते। 'ओ३म्' इत्येकाक्षरं ब्रह्म' अत्र ब्रह्मशब्देन ब्रह्मवाचक-मित्यर्थो लक्ष्यते। विशेषणविशेष्यभावश्चात्र सम्बन्धः। [१]'काकः काकः पिकः पिकः' अत्र काकपिकशब्दाभ्यामुक्तसम्बन्धेन निन्द्यस्तुत्यौ लक्ष्येते। 'धनुर्भृतां हस्तवतां पृषत्काः' अत्र [२]हस्तशब्देन प्रशस्ता हस्ता लक्ष्यन्ते। एवं 'रामस्य गात्रमसि' इत्यादौ व्यर्थं पदं [३]किञ्चिदर्थं गमयति। तत्र विशेषणविशेष्यभावः सम्बन्धः। 'हरिवंशः श्रूयते'। 'रघुवंशः पठ्यते' इत्यादौ हरिवंशरघुवंश-शब्दाभ्यां तत्प्रतिपादकग्रन्थयोर्लक्षणा। वर्ण्यवर्णकभावश्च सम्बन्धः। 'कुमारकिरातनैषधाः पठनीयाः' अत्रापि वर्ण्यनाम-भिस्तद्वर्णका ग्रन्था लक्ष्यन्ते। [४]नामैकदेशे [५]नाममात्रस्यापि ग्रहणं चेदवयवावयविभावोऽस्तु। 'अनुकूलं भाषते' अत्र कूलमनु-गतमनुकूलमिति व्युत्पत्त्या तीरलग्नं नदीजलं वाच्यम्। तत्सा-दृश्याद्वचने लक्षणा। उपमानोपमेयभावः सम्बन्धः। 'विलोमं वक्ति' अत्र विपरीतं लोम विलोममिति व्युत्पत्त्या [६]वक्राकृति लोम वाच्यं, तत्सादृश्याद्वचने लक्षणा। 'समीपं गतः' सङ्गता आपोऽ-स्मिन्निति समीपम् 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इत्यकारस्येकारः।

---

१. ङ 'वसन्तकाले सम्प्राप्ते' इत्यनन्तरं 'काकः' इत्यादि पाठोऽस्ति। २. इ. 'हस्तवतां-हस्तलाघववतां धनुर्भृतां विशेष्यविशेषणभावः सम्बन्धः' इत्यधिक पाठः ३. ग. 'किञ्चिदर्थम्' इति पाठः। ४. क. ग. घ. ङ 'नामैकदेशेन' इति पाठः। ५. क. ङ 'नाममात्रग्रहणम्' इति पाठः। ग. 'समस्तनामग्रहणम्' इति पाठः। ६. ग. 'वक्रीकृतं लोम विलोम' इति पाठः।

[१]सुलभजलस्थानं वाच्यम् । तत्सादृश्यात् पार्श्ववर्तिनि प्रदेशे लक्षणा । एवं सम्बन्धान्तराणि स्वयं विभावनीयानि । प्रायो न्यायशास्त्रानुसारादियं विवेचना । अवयवावयविभावस्य कार्यकारणभावस्य सामान्यविशेषभावस्य च द्वैविध्येऽपि न दोषः ।

अत्र त्रिविधे साक्षात्सम्बन्धे सत्येव लक्षणेति न नियमः, प्रत्यक्षे संयुक्तसमवायादिवत् परम्परासम्बन्धस्यापि लक्षितलक्षणादावुपयोगदर्शनात् । तथा [२]च लक्षितेन—लक्षणया गृहीतेन भ्रमरादिशब्देन द्विरेफादेः षट्पदपिण्डादौ लक्षणा लक्षितलक्षणेत्युच्यते । तत्र द्विरेफशब्दो द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या यौगिको न तु [३]रूढो, [४]भ्रमरशब्दस्य द्विरेफपरतया प्रयोगदर्शनात् । तेन निर्जरगुर्जरजर्जरादिसकलरेफद्वयान्वितशब्दसाधारणवाची न तु केवल भ्रमरपरः । तत्र सामान्यविशेषभावसम्बन्धेन भ्रमरशब्दो लाक्षणिकः। यथा—'मुनिमभिमुखतां निनीषवो याः' इत्यत्र मुनिशब्दो नृपतिमुनौ लाक्षणिकः । 'नृपतिमुनिपरिग्रहेण [५]या भूः सुरसचिवाप्सरसां जहार चेतः' इति प्रयोगदर्शनात् । अथवा वाच्यवाचकभावेन लक्षणयाऽभेदारोपाद् भ्रमरशब्दलक्षितषट्पदे द्विरेफशब्दस्योक्तरीत्या लक्षणा लक्षितलक्षणा । तत्र सम्बन्धद्वयसम्भवात् परम्परासम्बन्धः ।

एवं यत्र नामैकदेशेन नाममात्रग्रहणं, तत्रावयवावयविभावसंबन्धेन समग्रशब्दे लक्षणा । ततस्तदर्थे वाच्यवाचकभावेनेतिबोध्यम् । यथा 'आभाकासितपक्षेषु' इति । इहाभाकेति शब्दावयवैराषाढभाद्रपदकार्त्तिका अवयविनो लक्ष्यन्ते । ततस्तदर्थभूता मासा इति । एवं 'भीमो भीमसेन' इत्यादावपि द्रष्टव्यम् ।

१. ग. 'सुलभजलस्थानं च' इति पाठः । २. ग. 'च' इति नास्ति । ३. क. ग. ङ 'योगरूढः' इति पाठः । ४. ग. ङ 'भ्रमरशब्दपरतया प्रयोगदर्शनात्' इति पाठः । ५. क. ख. ग. घ. 'सा भूरिति प्रयोगदर्शनात्' इति पाठः ।

व्याकरणमते तु 'विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा[1] लोपो वक्तव्यः' ( का० वा० ) इति भीमादिषु शक्तिरेव।

व्यतिरेकलक्षणायामपि परम्परासम्बन्ध एव। 'नयेन जेतुं जगतीं सुयोधनः' अत्र सुयोधनशब्देन दुर्योधने[2] लक्षणा ( सुयोधनशब्दस्य दुर्योधनशब्दे लक्षणा ) ततस्तद्वाच्ये राज्ञीति विवेकात्। एवं 'साधु दूति पुनः साधु' इत्यादावपि बोध्यम्।

अथ गौण्या[3] विशेषः। गौणलक्षणायामपि परम्परासम्बन्धः। उपमानोपमेयधर्माणामभेदारोपानन्तरं द्वितीयलक्षणाप्रवृत्तेः। तत्र-राजेन्द्रः, राजेन्दुः, नृसविता, नृसोमः, भूपालसिंहमित्यादौ ( भूपाल सिंह इत्यादौ ) उपमितसमासे व्यस्तोपमायां समस्तरूपके च लक्षणा नास्ति। 'समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत्' ( वैया० भू० सा० शक्तिनि० ) इति। शब्दार्थस्य एवकारार्थस्य च समासशक्त्या निर्वाहादिति प्राञ्चः।

यद्यपि सिद्धान्तकौमुद्याम् 'इहपूर्वपदं तत्सदृशे लाक्षणिकमित्युक्तम्' तथापि लाक्षणिकसदृशमिति तदर्थाश्रयणेन समासशक्तिविवक्षैव तत्रानुसन्धेया। अन्यथा स्वसिद्धान्तभङ्गापत्तिः। 'उद्बाहुरिव वामनः' इत्यादाविवशब्दस्य सादृश्यवाचित्वादारोपाभावाच्च लक्षणाऽभावः। 'मुखं[4] चन्द्रः' इत्यादौ समस्तरूपके त्वारोपसत्त्वेऽपि तस्य समासोत्पन्नसमुदायशक्त्या निर्वाहाल्लक्षणाऽभावः। अत एव व्यस्तोदाहरणानि दर्शितानि 'गौर्वाहीक'[5] इत्यादीनि प्राचीनैः। कोविदानन्देऽपि 'स्त्रीरत्नं गिरिजा' इत्यत्र व्यस्तमेवोदाहरणमित्यवधेयम्। एवं वृत्त्यन्तरेऽप्यूह्यम्। अत्रोपमानोपमेय-

---

१. ख. ग. ङ. 'पूर्वोत्तरयोः' इति पाठः। २. 'दुर्योधनशब्दे' इतिपाठः। ३. ग. 'गौण्याम्' इतिपाठः। ४. ग. ङ. 'मुखचन्द्रः' इति पाठः। ५. ग, घ, गौर्वाहीक' इत्यादीनि' इति नास्ति।

भावः सम्बन्धः । सादृश्यं तु तदेव । तल्लक्षणं तूक्तं विद्यानाथेन-

'अन्योन्यधर्मशालित्वं स्पष्टं सादृश्यमुच्यते ।
तन्मूलमुपमादीनां हारादीनां हिरण्यवत् ॥ इति ।

अत्र स्पष्टपदेन देवदत्तयज्ञदत्तयोः पशुत्वाभावे मनुष्यत्व-ब्राह्मणत्वादिधर्मेण सादृश्यं, स्पष्टत्वस्य [1]सम्प्रदायारूढत्वात् । अन्योन्यशब्देन तद्धर्माभिन्नत्वमुक्तम् । ततश्च भिन्नयोर्धर्मिणोरभिन्नधर्मशालित्वं सादृश्यमित्युक्तं भवति । ननु अन्य-धर्मस्यान्यत्रासम्भवादन्योन्यधर्माभेदः कथमिति चेदुच्यते, 'तापेन भ्राजते सूरः शूरश्चापेन राजते' इत्यादौ सूरशोभाशूरशोभयोर्भेदेऽपि सजातीयत्वेन भेदाभावः । रूपकादौ त्वभेदारोपाद् भेदाभावः । अयश्च वस्तुप्रतिवस्तुभावः कथ्यते । 'त्वमेव कीर्तिमान् राजन् ! विधुरेव हि कान्तिमान्' इत्यादौ च कीर्त्तिमत्त्व-कान्तिमत्त्वयोर्वैजात्येऽपि बिम्बप्रतिबिम्बभावेनाभेदप्रतीतियोग्य-त्वम् । अत एव लक्षणेऽभिन्नशब्देनाभेदप्रतीतियोग्यत्वं विवक्षित-मिति बोध्यम् । सारोपायां गुणमात्रे लक्षणा । गुणी तु शक्त्या गृह्यते । साध्यवसानायां तु द्वयोरपि, तत्र[2] विषयस्य [a]निगरणात् । स्वेच्छयाऽतस्मिंस्तद्बुद्धिरारोपः । स्वेच्छया विषयिणा विषयग्रहण-मध्यवसानम् । श्रीधरस्वामिना गौणी वृत्तिर्भिन्नैवेत्युक्तम् । यदि लक्षणावृत्तिर्न स्यात्तर्हि 'घृणाकरं, त्रपाकरम्, अमङ्गलञ्चेति त्रिविध-मश्लीलं वारयितुं कः क्षमते ( क्षमेत ) । तथाहि—

'विष्ठोत्सारणकर्त्ता कार्येषु पादचार्यनुगः ।
कृतयभना[3] च विटस्त्री कार्ये गर्ह्येऽपि तुच्छमूल्यानि ॥

---

[a] निगरणात्-स्वशब्देनानुपादानात् ।

---

१. ग, 'संप्रदायारूढत्वात्' इति पाठः । २. ङ. 'विषयनिगरणात्' इति पाठः । ३. क, ख, ग, घ, 'कृतजभना' इति पाठः ।

अत्र लक्षणया दोषोद्धारः ।

मलसंमार्जनकर्त्ता त्यक्तात्मदेहश्च पादचार्यनुगः ।
कृतगमना च विटस्त्री कार्ये गुह्येऽपि तुच्छमूल्यानि ॥

अत एवाहुः—

शक्तिं भजन्ति सरला लक्षणां चतुरा नराः ।
व्यञ्जनां नर्ममर्मज्ञाः कवयः कमना जनाः ॥

इति[1] श्रीपदवाक्यप्रमाणपारावारीणमहोपाध्यायाशाधरभट्ट-
विरचितायां कोविदानन्दसहजायां त्रिवेणिकायां
द्वितीयं लक्षणाप्रकरणं समाप्तम् ।

---

## अथ व्यञ्जनाप्रकरणम्

शक्यलक्ष्यार्थातिरिक्तार्थबोधिका वृत्तिर्व्यञ्जना । सा च[2] मुख्यार्थबाधाभावेऽपि प्रवर्तते शक्यलक्ष्यार्थबोधनानन्तरं[3] च । तेन शक्तिमूला लक्षणामूला चेत्याहुः । दूरार्थबोधे व्यञ्जनामूलापि व्यञ्जना भवति । क्रमेणोदाहरणानि—तत्र[4] प्रकृताप्रकृतश्लेषे शक्तिमूला व्यञ्जनेति प्राञ्चः । सा यथा—

आशाधरहृदुत्पन्ना विमला बुद्धिशुद्धिदा ।
कोविदानन्दसहजा ऽनुग्राह्यैषा त्रिवेणिका ॥

अत्र ग्रन्थपरत्वेन तीर्थपरत्वेन कन्यापरत्वेन च योजनायां पक्षत्रयम् । तत्र ग्रन्थतीर्थयोरभेदोपचारात् प्रकृतश्लेषः । तत्र

---

१. ङ 'इति लक्षणाप्रकरणम् ॥ श्रीः ॥ ग. इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टविरचितायां त्रिवेणिकाख्यायां वृत्तिविवेचनायां द्वितीयं लक्षणाप्रकरणम् ।

२. ग, 'च' नास्ति । ३. क, 'शक्यलक्ष्यार्थातिरिक्तार्थबोधानन्तरम्' इति पाठः । ४. ग, 'तत्रेत्यारभ्य प्राञ्चः' इत्येतत्पर्यन्तं पाठो नास्ति ।

सादृश्यमात्रं व्यञ्जनागम्यम्। कन्यापक्षस्तु व्यञ्जनागम्यः। तत्र येषां शब्दानां विनिमयः कर्त्तुं न शक्यते तदाश्रया व्यञ्जना। शब्दावयवाश्रयापि सा दृश्यते। यथा—

दानी पानी तथा ज्ञानी ध्यानी मानी निधान्यपि।
राजा मयूरचित्रोऽयं येन राजन्वती क्षितिः॥

दानी—बहुप्रदः, पानी—मद्यपः, ज्ञानी—सुज्ञः, ध्यानी—नित्यं ध्याननिष्ठः, मानी—अतिशयितमानः, निधानी—निधिसम्पन्नः। अत्र-

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः॥

इति वार्तिकोक्तया (क्ताः) भूमादयोऽर्था व्यञ्जनागम्याः, तद्धितद्योत्यत्वात्। द्योत्यार्थस्य काव्यप्रकाशे व्यङ्ग्यत्वस्वीकारेण तद्गतो ध्वनित्वमुदाहृतम्। द्योत्यार्थे हि संकेताभावान्न शक्तिः। शक्यार्थबोधानन्तरं तद्बोधाच्च, शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। नापि लक्षणा प्रत्ययमुख्यार्थबाधाभावात्। [1]सम्बन्धाभावाच्च। 'राजन्वती' इत्यत्रापि राजपदं शोभनराज्ञि लाक्षणिकमिति न भ्रमितव्यम्, वृत्तौ लक्षणा नास्तीति सिद्धान्तात्। तत्र नकारोच्चारेण शोभनत्वं व्यज्यत इति प्रकृत्याश्रया व्यञ्जनैवेति[2] दिक्॥ अर्थाश्रया उभयाश्रया च व्यञ्जना कोविदानन्दे द्रष्टव्या।

लक्षणामूला यथा 'कलत्रवानहं बाले! कनीयांसं भजस्व मे' अत्र कलत्रशब्देन तत्सान्निध्ये लक्षणा। अन्यथा लक्ष्मणस्यापि तथात्वापत्तेः। 'बाले' इत्यनेन च 'भूरिकामे'[3] (इत्यत्र) लक्षणा। "बाला स्यात् षोडशाब्दा तदुपरि तरुणी

१. क. ग. घ. ङ 'तत्सम्बन्धाभावाच्च' इति पाठः। २. ङ 'केचित्' इति पाठः। ३. ग. घ. ङ 'भूरिकामत्वे' इति पाठः।

त्रिंशतो यावदूर्ध्वम्" इति रतिरहस्योक्तेः। ततश्चाहं भोगतृप्तत्वान्न-त्वदभिगम्यः। मत्तो हि कामातुरायास्तव सन्तोषो न स्यादिति व्यज्यते। किञ्च स्वस्य पत्नीसान्निध्योक्त्या एकपत्नीव्रतं गम्यते। तत्सन्निधौ दुष्टाचरणनिषेधात्। सीतायाः स्वाधीनपतिकात्वं चेति। ततश्च 'कलत्रवानहं क्व, बाला त्वं क्व' इति विषमालङ्कारोऽपि गम्यः। 'कनीयांसम्' इति लक्ष्मणविशेषणादसन्निहितकलत्रः। कनिष्ठश्च स बालायास्तवानुरूप इति समालङ्कारोऽपि गम्यः। स्वस्य लक्ष्मणस्य च विषमालङ्कारः। यद्वा कलत्रशब्देन लावण्यादिगुणसम्पन्ने कलत्रे लक्षणा। तेनातादृश्या त्वया मम किं प्रयोजनमिति [1]व्यज्यते। व्यजनामूला व्यञ्जना यथा—

> क्षीरत्यजं नीरपिबं च हंसं व्यासं विरक्तं च शुकं गृहस्थं।
> वदामि, वाणी मम चेद्यथार्था तदा सुधीभिर्मम धीर्न निन्द्या॥

अत्र सुधीशब्देन परीक्षाकुशलत्वं व्यज्यते। सुधियो हि परीक्षामन्तरेण स्तुतिं निन्दां वा न कुर्वन्ति। परीक्षा हि हंसानां क्षीरेण सह परिचयाभावात् तद्ग्रहणपाटवं न स्यादेवेति युक्तिः। तत्सदृशानां ज्ञानिनामपि स्थूलतया निन्द्यपरिणामतया आपातरमणीयतया च विषयसुखं हेयं भवति। सूक्ष्मतया निर्विकारतया सर्वकालरमणीयतया[2] च ब्रह्मसुखमुपादेयं भवतीति युक्तम्। लोकप्रसिद्धं तु न तथेति। किञ्च व्यासस्य पत्न्यश्रवणात् [3]अरण्ये [4]पतिताच्छुकीनामाप्सरोदर्शनक्षुभिताद्वीर्यात्[5] पुत्रोत्पत्तिवर्णनात् ब्रह्मविद्याप्रवर्त्तकत्वेन[6] विरक्तत्वमध्यवसीयते। प्रसि-

---

१. क. ग. घ. ङ 'गम्यते' इति पाठः। २. ग. 'सर्वकालरमणीयत्वेन' इति पाठः। ३. ग. घ, 'अरण्याम्' इति पाठः। ४. ग. 'पतिताच्छुक्रात्' इति पाठः। ५. 'वीर्यात्' इति नास्ति। ६. ग. 'प्रवर्तकत्वाच्च' इति पाठः।

द्भारतकथामनादृत्य पत्नीद्वारा पुत्रोत्पत्त्यादिकथनं विरुद्धमेव। शुकस्य चापत्यपञ्चकवर्णनात् स्वरूपेण रूपान्तरेण वा गृहस्थत्वमिति बोध्यम्। तत्र हरिवंशे स्वरूपेण भागवते च 'स कृत्व्यां शुककन्यायाम्' इति शुकोक्तौ मम कन्यायामिति वक्तव्येऽपि शुकपदं रूपान्तर [1]बोधनार्थमिति। एवं परीक्षिते [2]युक्तिमूला शास्त्रमूला च मम वाणी [3]सत्या भवति [4]चेत्तर्ह्येतदर्थविषया मम धीः [5]स्तुत्यैवेति सुधीशब्दगम्योर्थः। ततश्चास्मिन् ग्रन्थे कोविदानन्दे च प्रसिद्धिविरुद्धं किञ्चिदस्ति चेत् परीक्ष्य स्तुत्यमेवेति प्रार्थना व्यज्यते।

अत्र तार्किकाः—व्यङ्ग्यार्थो ज्ञापकेन हेतुनाऽनुमीयते। तदर्थं न व्यञ्जना स्वीकार्या, 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायात्, अतिरिक्तवृत्तिस्वीकारे गौरवाच्चेत्याहुः, तन्न—

साधु दूति पुनः साधु कर्त्तव्यं किमतः परम्।
यन्मदर्थे विलूनासि दन्तैरपि नखैरपि॥

अत्र [6]काकुवक्रोक्तौ व्यतिरेकलक्षणामूलव्यञ्जनया मद्रमणेन सह विलसन्त्या त्वयाऽनुचितस्वार्थसाधनं कृतमिति व्यज्यते। अत्र दन्तैर्नखैश्च [7]विलूनत्वं हेतुः। तस्य च नियुक्त(द्ध)साधारणत्वेन सव्यभिचारत्वान्नानुमानसिद्धिरिति व्यञ्जना स्वीकार्या। एवमन्यत्रापि ज्ञेयम्।

अत्र वैयाकरणाः—'अत्र शक्तिरेव शब्दवृत्तिः। [8]तस्याः प्रसिद्ध्यप्रसिद्धिभ्यां शक्तिलक्षणाव्यपदेशः। व्यञ्जना तु तत्रैवा-

---

१. ङ. बोधनायेति' इति पाठः। २. ग. 'युक्तिमूला, शास्त्रमूला' इत्यस्य स्थाने 'परीक्षिते' इति पाठः। ३. घ. ङ. 'सत्यार्थवती' इति। ४. ग. 'यदि इति। ५. ग. 'स्तुत्यैव भवतीति' इति पाठः। ६. ग. घ. 'काकुवक्रोक्त्यौ' इति पाठः। ७. ग. 'विलूनहेतुः' इति पाठः। ८. ग. 'तस्याश्च' इति पाठः।

न्तर्भवति,[1] दीर्घव्यापारस्वीकारात्' इति तन्न—सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति न्यायात् वाच्यार्थबोधानन्तरं व्यङ्ग्यार्थे शक्तेर-प्रवृत्तेः ।

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा ।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥

( वैयाकरणभूषणसार० शक्तिनि० ३७ कारि० )

इति शक्तिलक्षणस्य व्यञ्जनायामप्रवृत्तेश्च । व्यञ्जनाया अनादित्वाभावात् काव्यस्योत्तमादिभेदत्रयानुपपत्तेश्च । उत्तमं काव्यं हि व्यङ्ग्यार्थप्रधानम् । तद्भिन्नं च मध्यमम् । गोमूत्रिकादिशब्दचित्रं वायुमित्रसुतबन्धुवाहनेत्याद्यर्थचित्रं चाधमम् । अनुप्रासोपमाद्यर्थचित्रं चमत्कारकारित्वात् क्वचिदुत्तमं क्वचिन्मध्यमं च । अधमं तु न काव्यतया गणनीयम् । यथाह ध्वनिकारः—

प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते ।
उभे काव्ये तदन्यद्यत्तच्चित्रमभिधीयते ॥

( ध्वन्यालो० तृती० उद्यो०, ४१ कारि० पृ० ४६४ ) इति ।

ततश्च सिद्धं व्यञ्जनायाः सफलत्वमिति[2] दिक् ॥

[3]इति व्यञ्जनानिरूपणम्

———

१ 'तत्रान्तर्भवति' इति पाठः । २. घ. ङ. 'फलवत्त्वम्' इति पाठः ।
३. ग. ''इति श्रीपदवाक्यप्रमाणपारावारीणरामजीभट्टात्मजाशाधरभट्टविरचितायां त्रिवेणिकायां व्यञ्जनाप्रकरणम् । समाप्तोऽयं ग्रन्थः । संवत् १८३० तमे कृतमिद-माशाधरभट्टेन पुस्तकम् ।

यदिह लिखतामव्युत्पत्त्या पतेल्लघु दूषणं
निपुणधिषणैरुज्झित्वा तत् कृतिर्मम सेव्यताम्।
सरसि विमले वातक्षिप्तं निवार्य तु शैवलं
सलिलममृतप्रायं प्रायः पिबन्ति पिपासवः॥ १ ॥

यदि मम सरस्वत्यां कश्चित् कथञ्चन दूषणं
प्रलपति ततः प्रौढप्रज्ञैः स किं कविभिः समः।
रघुपतिकुटुम्बिन्यां सत्यामवद्यमुदाहरन्
हतकरजकः साम्यं लेभे स किं सह राजभिः॥ २ ॥

प्रभापटले निद्धमिदं हरिणीद्वयं तापापनोदाय त्रिवेणिकाप्रान्ते-निक्षिप्तम्। यथा रघुवंशस्थाः श्लोकाः कुमारसम्भवे स्वकृतत्वा-न्निक्षिप्ताः।

इति पदवाक्यप्रमाणपारावारीण श्रीरामजीभट्टात्मजाशाधरभट्ट-विरचिता त्रिवेणिका समाप्ता

श्रीः

# त्रिवेणिकोद्धृतपद्यानां वर्णक्रमानुसारिणी सूची


| पद्यम् | | पृष्ठम् |
|---|---|---|
| १ अन्योन्यधर्मशालित्वम्० | ( विद्यानाथः ) | ३२ |
| २ आभाकासितपक्षेषु० | | ३० |
| ३ आशाधरहृदुत्पन्ना० | ( त्रिवेणिका ) | ३३ |
| ४ इन्द्रियाणां स्वविषयेषु० | ( वैयाकरण भू० शक्तिप्रकरणम् ) | ३७ |
| ५ उत्फुल्लस्थल० | | |
| ६ उद्बाहुरिव वामनः० | ( रघु ११, ३ ) | ३१ |
| ७ कलत्रवानहं बाले ! ० | | ३४ |
| ८ जीवो जल्पति जीविकाः | ( नैषधे १७, ३६ ) | १३ |
| ९ तदा निदद्रावुपपल्वलं खगः० | (नैषधे १, १२१ ) | २४ |
| १० तापेन भ्राजते सूरः० | (  ) | ३२ |
| ११ त्वमेव कीर्तिमान् राजन्० | (  ) | ३२ |
| १२ देवनां सुप्रशंसत्वाद्० | ( महाभारते ) | |
| १३ दानी पानी तथा ज्ञानी० | | ३४ |
| १४ धनुर्भृतः संयति० | ( किराते० १ ) | २० |
| १५ धनुर्भृतां हस्तवतां पृषत्काः० | | २६ |
| १६ न खलु न खलु बाणः० | ( अभिज्ञानशाकुन्तले ) | ८ |
| १७ नयेन जेतुं जगतीं सुयोधनः० | ( किराते १, ७ ) | ३१ |
| १८ निरुध्यमाना यदुभिः० | ( शिशुपालवधे ३, २६ ) | २७ |
| १९ निदर्शनं नैषधम्० | | २८ |
| २० नृपतिमुनिपरिग्रहेण० | ( किराते० १०, ६ ) | ३० |
| २१ पद्मानि यस्याग्र० | | |
| २२ पाकं कुरुष्व पाकार्थम्० | ( कोविदानन्दे ) | ६ |
| २३ पुंस्कोकिलो यन्मधुरं चुकूज० | ( कुमारसम्भवे ) | २२ |
| २४ प्रधानगुणभावाभ्याम्० | ( ध्वन्यालोके० ३,४१ ) | ३७ |
| २५ बाला स्यात् षोडशाब्दा० | ( रतिरहस्ये ) | ३४ |
| २६ भवेतां यदि वृत्तेषु० | ( रसप्रदीपे ) | ७ |
| २७ भङ्क्तुं प्रभुर्व्याकरणस्य० | ( नैषधे २, ८४ ) | १६ |

| पद्यम् | | पृष्ठम् |
|---|---|---|
| २८ भूमनिन्दाप्रशंसासु० | ( कौमुद्यां ५,२,९४ वार्तिक ) | ३४ |
| २९ मलसंमार्जनकर्त्ता० | | ३३ |
| ३० मुनिमभिमुखताम्० | ( किराते १०,४० ) | ३० |
| ३१ मृगाङ्कत्वेऽपि न मृगी० | ( अद्वैतविवेके ) | १६ |
| ३२ यस्माच्चण्डञ्च मुण्डं च | ( मार्कण्डेयपुराणे ) | ६ |
| ३३ यस्य वेश्मनि० | | १६ |
| ३४ यस्य गेहे | | १७ |
| ३५ येन लिङ्गेन यो देशः० | ( महाभारते ) | २० |
| ३६ यन्नाम्ना यत्र चैत्यादिः० | ( काव्यप्रदीपे ) | २० |
| ३७ यदिह लिखताम्० | ( त्रिवेणिकायाम् ) | ३८ |
| ३८ यदि मम० | | |
| ३९ रघूणामन्वयं वक्ष्ये० | ( रघुवंशे १,९ ) | २७ |
| ४० रामः सीतां स्मरन्दूनः० | ( वाल्मीकीयरामायणे ) | १५ |
| ४१ रामस्य गात्रमसि० | ( उत्तररामचरिते ) | २६ |
| ४२ विधिहेतुरहेतुरागसाम्० | ( किराते २,३४ ) | २६ |
| ४३ विष्ठोत्सारण कर्त्ता० | | ३३ |
| ४४ शक्तिं भजन्ति सरलाः० | | ३३ |
| ४५ शक्ति भक्ति व्यक्ति० | ( त्रिवेणिकायाम् ) | २ |
| ४६ शीतं गुणे तद्वदर्थाः० | ( अमरकोषे १,१८३ ) | २७ |
| ४७ स एव कालेन दुरत्ययेन० | | २८ |
| ४८ समासे खलु भिन्नैव० | ( वैयाकरणभूषणे ) | ३१ |
| ४९ स कृत्व्याम्० | ( भागवते ६,२५,२१ ) | ३६ |
| ५० साधु दूति पुनः साधु० | | ३१ |
| ५१ साधु दूति पुनः साधु० | | ३६ |
| ५२ सुधाकरसुहृद्वक्त्रम्० | | १५ |
| ५३ सुरद्विषश्चान्द्रमसीसुधेव० | ( रघुवंशे ) | २४ |
| ५४ सेतुबन्धे नरः स्नात्वा० | | २६ |
| ५५ सैन्यानि सोमान्वयमन्वयुः० | | २७ |
| ५६ हिमांशुवंशस्यकरीरमेव० | ( नैषधे ) | २१ |
| ५७ क्षत्रजातिरुदियाय भुजाभ्याम्० | | २८ |
| ५८ क्षीरत्यजं नीरपिबं च हंसम्० | | ३५ |

## त्रिवेणिकोद्धृतग्रन्थानां वर्णक्रमानुसारिणी सूची


| पद्यम् | | पृष्ठम् |
|---|---|---|
| १ | अद्वैतविवेकः ... ... | १६ |
| २ | अमरकोषः ... ... | २१ |
| ३ | काव्यप्रदीपः ... ... | २० |
| ४ | काव्यप्रकाशः ... ... | २२ |
| ५ | कोविदानन्दः ... ... | ६ |
| ६ | निरुक्तम् ... ... | ७ |
| ७ | नैषधीयचरितम् ... ... | १५ |
| ८ | प्रातिशाख्यम् ... ... | १५ |
| ९ | भागवतसुबोधिनी ... ... | १ |
| १० | महाभारतम् ... ... | ९ |
| ११ | महाभाष्यम् ... ... | १३ |
| १२ | मार्कण्डेयपुराणम् ... ... | ९ |
| १३ | रसप्रदीपः ... ... | ७ |
| १४ | लिङ्गपुराणम् ... ... | १० |
| १५ | वार्तिकम् ... ... | ३४ |
| १६ | साहित्यदर्पणः ... ... | २ |
| १७ | सिद्धान्तकौमुदी ... ... | ३१ |
| १८ | हैमकोशः ... ... | १२ |


## त्रिवेणिकोद्धृतग्रन्थकर्तॄणां वर्णक्रमानुसारणी सूची


| | | |
|---|---|---|
| १ | अमरसिंहः ... ... | २७ |
| २ | पतञ्जलिः ( भाष्यकारः ) ... ... | ६ |
| ३ | मल्लिनाथः ... ... | १ |
| ४ | वामनः ... ... | १७ |
| ५ | शङ्करस्वामी ... ... | २१ |
| ६ | श्रीधरस्वामी ... ... | ३२ |

## भूमिकायाः शुद्धिपत्रकम्

| अशुद्धयः | शुद्धयः | पङ्क्तयः | पृष्ठम् |
|---|---|---|---|
| १ त्रिपाठी | त्रिपाठिनो | ५ | ३६ |
| २ प्राविण्येन | प्रावीण्येन | १३ | ३६ |
| ३ त्रिवेणिकेयम् | त्रिवेणिकामिमाम् | १३ | ३६ |
| ४ त्रिवेणिकादर्शनजन्यभ्रान्तिमूलकमेव | त्रिवेणिकादर्शनजन्यभ्रान्तिमूलकमेवेति केनचिदुक्तमसङ्गतम् श्रीकाणेमहोदयैरुभयोरपि संग्रहात् । | २२ | २७ |

———

# अत्यावश्यकसूचना

संस्कृतसेविनो हिन्दीहितैषिणश्च विपश्चितः सूचयन्नहं परमं प्रमोदमनुभवामि यद् वाराणसेय भारतीय-साहित्य-ग्रन्थमालाया अष्टमं पुष्पम् सर्वाङ्गपूर्णः अतिविपुलकलेवरः पुराणतत्त्वमीमांसानामको ग्रन्थोऽचिरमेव प्रकाशमेष्यति। तत्र पुराणसम्बन्धिनः सन्दिग्धा विविधा विषया राष्ट्रभाषामाध्यमेन विवेचिता भविष्यन्ति, आक्षेपपरिहारार्थं यत्र तत्र तत्तत्पुराणानां शास्त्रान्तराणाञ्च वचनानि प्रमाणकोटौ उपस्थापयिष्यन्ते, वेदैः सह पुराणानामेकवाक्यतायै गवेषणात्मिका समीक्षा च करिष्यते। अभिनवस्यास्य ग्रन्थस्य सर्वसाधारणोपयोगित्वसम्पादनाय सरला सुगमा सर्वजनहृदयङ्गमा च हिन्दीभाषा स्वीकृताऽस्ति। मन्ये एकेनानेना ग्रन्थेन पुराणविषयकाः प्रचीना अर्वाचीनाश्च बहवः प्रश्ना नूनं समाहिता भविष्यन्ति, अल्पीयसैव प्रयासेन पुराणविषयकं पर्याप्तं ज्ञानं भविष्यति, पुराणरत्नमन्थनप्रवृत्तानां विदुषां विद्यार्थिनाञ्च पुराणानुशीलने मार्गः प्रशस्तो भविष्यति, भारतीयार्यसंस्कृतेः प्रसारे पुराणतत्त्वान्वेषणे च महत्साहाय्यं भविष्यति, हिन्दूधर्मस्य च गौरवसंरक्षणे महान् लाभः सम्पत्स्यते। एतत्सम्बन्धे जिज्ञासुभिः स्वसम्मतिप्रदानपूर्वकं निम्नसङ्केतेन पत्रव्यवहारो विधेयः।

श्रीकृष्णमणित्रिपाठी
व्यवस्थापकः
भारतीय साहित्य विद्यालय
१४/२६ टेढीनीम,
वाराणसी।